कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः



कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2330 विषय

नाव वाग्भटालंकार

लेखक / लिपीकार श्रीनरसिंह गोपि

पृठ 67 काळ शके 1688 पूर्ण / अपूर्ण

॥ वाग्भटालंकारपुस्तकारंभपत्रमिदं ज्ञेयम् ॥

भट्टा॰

॥ श्रीमन्महागणपतये नमः ॥ श्रीमन्महागुरुभ्यो नमः ॥ श्रियं ॥ श्रीवर्द्धमान
जिनपतिरनंतविज्ञानसंततिर्जयति । यद्धीःप्रदीपकलिकाकलिकालतमः
शमं नयति ॥१॥ वाग्भटकवींद्ररचितालंकृतिसूत्राणि किमपि विवृणोमि ।
मुग्धजनबोधहेतोः स्वस्य स्मृतिबीजरक्षेच ॥ श्रियं ॥ इह शिष्टाः क्वचि
दिष्टवस्तुनि प्रवर्त्तमाना अभीष्टदेवतानमस्कारपूर्वकमेव प्रवर्त्तंते इति
शिष्टसमयपरिपालनाय । तथा । श्रेयांसि बहुविघ्नानि भवंति महता
मपि । अश्रेयसि प्रवृत्तानां क्वापि यांति विनायकाः ॥ इति वचनान्म
हस्य शास्त्रस्य काव्यार्थिनां सम्यक्ज्ञानोपदेशकतया श्रेयोभूतस्य
पि विघ्नभूतं इति विघ्नोपशांतये च शास्त्रारंभे अभीष्टदेवतानमस्का
हाकविः श्रीवाग्भटः प्रकटयति । श्रियमिति । व्याख्या । श्रीनाभेयजि

वः श्रियं दिशतादिति संटंकघटना। नाभे[illegible]रपत्यं नाभेयः। इतो। निजुरति

विण्यण्॥ श्रियायुक्तो नाभेयः। मयूरव्यंसकादयश्चेति मध्यमपदलोपी स

मासः। श्रीनाभेयश्चासौ जिनश्चेति कर्मधारयः। दीव्यतीति केवलज्ञानश्रि

दीप्यत इति देवः। एते भगवतो ज्ञानातिशयः सूचयांचक्रे। श्रीनाभेयदे

श्रियाऽष्टमहाप्रातिहार्यादिलक्ष्म्या युक्तत्वप्रतिपादनेन प्रभोः पूजाति

यः प्रत्यपादि। जयति रागद्वेषादिरिपून् पराभवतीति जिनः। अनेन पर

स्यापायापगमातिशयो ज्ञापितः। मोक्षमार्गमित्यादिनोत्तरार्द्धेन पुनः स्वा

मिनो वचनातिशयः ख्यापितः। एवं चत्वारोपि मूलातिशयाः प्रज्ञापितास्य।

[illegible]त्तेदेशिनिसिः संबंधश्च सूचकैः। स इति गम्यते। ततश्चायं सः श्रीनाभेयजिनो वो

युष्माकं श्रियं कल्याणं लक्ष्मीं वा ददात्विति भावः। सकलार्हत्। यस्य भगवत

आगमनपदानां सिद्धांतवचनानां आवली श्रेणिः। सतां विदुषां उत्तमानां मोक्षस्य मा-
सम्यकुरत्नत्रयाराधनरूपं प्रवीति। प्रकाशयतीत्यर्थः। अथ अन्यस्यापि कस्य-
चित् आगमस्य आगमनस्य पद्दानि पादप्रतिबिंबानि तेषां पंक्तिः दृष्टा सती स-
तां पंथानं प्रकटयती सुक्तिलेशः। तथा शास्त्रादौ त्रिविधानां देवतानां स्तुतिः
संभवति समुचितायाः १ इष्टायाः २ समुचितेष्टायाश्चेति तत्र समुचि-
तायाः स्तुतिर्यथा नीतिशास्त्रारंभे राजादेः। कामशास्त्रारंभे वा स्मर-
इष्टायाः स्तुतिर्यथा रघुकाव्ये शिवगौर्योः। समुचितेष्टायाः स्तुतिर्यथा आ-
गमशास्त्रारंभे महावीरयोगिनाथायेति। ३ अत्र पुनः शास्त्रारंभे श्रीना-
मस्कारेण अभीष्टदेवतास्तुतिं करोति श्रीवाग्भटः। अथवा श्रियो॰ इम-
तिशायलक्ष्म्याः इनः स्वामी श्रीनः। जिनश्रीकुत्सये। श्रीपतेरिति भयं भावे-

तरतीयः भयमिसर्थेः। नविद्यते भीर्भयं संसारभ्रमोद्भवं भयं यस्य सोऽभेयः ॥
जिनः श्रुतकेवल्यपि भण्यते। तस्यापि प्रायोरागादिजयात् तन्निरासार्थं अभे
श्यासो। जिनश्च अभेयजिनः। इत्येवं विधश्च सामान्यकेवल्यपि लभ्यते तस्य
वस्त्रमल भयाभावात्। तन्निराकरणार्थं श्रीनृश्यासोऽभेय जिनश्च श्रीन
पजिनइति। एवंविधश्चार्हन्नेव भवतीति सामान्यनार्हतां नमस्कारः स्तो
वति। यद्वा। काव्यशास्त्रस्य सर्वेषामपि साधारणोपयोगित्वात्। वैष्णवमते
पि नमस्कारस्य लेशतो व्याख्या। यथा। श्रीविष्णुनाभेरुत्पन्नत्वात् ब्रह्मापि।
नाभेयः कथ्यते। विष्णोर्नाभिस्थकमले विश्वकर्तुर्निवासः त्रिलोकीकोकैः ॥
तथा च श्रुतौ नाभिभूः पद्मभूः इत्यादीनि तन्नामानि। जिनो विष्णुः। मारजिज्जि
नः कुमोदक इति चिंतामणिवचनात्। ततश्च श्रीश्च नाभेयश्च श्रीनाभेयौ ता

न्यामुपलक्षितो जिनः श्री नाभेय जिनः श्रियं दिशतु। वाशब्दोत्र अव्ययं अवधा
रणे प्रकारे वा। किं विशिष्टः उदेवः उरीश्वरः इसेकाक्षरनाममालावचनात्। उः
शंभुः स एव वृहज्ज्वलो देवो यस्य स तथा। तदुक्तं। ब्रह्माच्युताभ्यर्चितपादपद्मो नष्ट
ज्योतिः किं मनुजैर्गिरीशइति। ननु नमस्कारस्य विघ्नघाते कथं सामर्थ्यं। उच्यते। न
मस्कारेण पुण्यमुपजायते पुण्येन विघ्नाः प्रतिहन्यंते इति। यत्रापि च न नमस्का
रमंतरेणापि निर्विघ्नं शास्त्रपरिसमाप्तिर्दृश्यते तत्रापि मानसिकत्रिधा
त रूपोयं घट एवेति सफलो नमस्कारव्यापारः। इति प्रथमपद्यार्थः॥१॥
मंगलं चाभिधेयं च संबंधश्च प्रयोजनं। लोके रेकथनीयानि शास्त्रस्य बु
धीमता॥१॥ तत्र मंगलमभिहितं नमस्कारवचनेन। अभिधेयं चात्र शा
सम्यक्काव्यस्वरूपं [illegible] उपायोपेयभावो वा ऽत्र संबंधः। वचनरूपापन्नं

१ ४ संबंधश्चास्य वाच्यवाचकभावादिः। तथाहि। एतच्छास्त्रं वाचकं सम्यक्काव्यस्वरूपं वाच्यं। १

१ ४ सर्वधर्म्यस्यवाच्यवाचकभावादिः। तथाहि। एतच्छास्त्रंवाचकंसम्यक्काव्यस्वरूपंवाच्यं।

इदंशास्त्रमुपायः। तत्परिज्ञानंचोपेयमिति। प्रयोजनंत्वनंतरंशिष्याणांशा
स्त्रार्थपरिज्ञानंपरंअपरंतुसम्यक्कुर्विचित्तलब्धस्फारकीर्तिप्रभृति। आ
चार्यस्यत्वनंतरंप्रयोजनंशिष्यानुग्रहः। परंअपरंतुतदेव। ऐहिकमिहमुत्रं
पारत्रिकंतुपरंपरंप्रयोजनमुभयेषामपिनिःश्रेयसावाप्तिरिति। अतोय
तेकेनचिन्नारब्धव्यमिदंशास्त्रमभिधेयादिरहितत्वात्। काकदंतपरीक्षा
त्। इतितन्नकिंचित्। उक्तस्युक्त्याभिधेयादिदर्शनात्। अमुमेवार्थ
मर्थयितुंवक्ष्यमाणार्थपरिच्छेदक्रमोद्देशांगंकाव्यफलमाह। साधु। अत्र
प्रस्तवात्शिष्यःकर्त्तागम्यते। ततःशिष्यःकाव्यंकवेःकर्मकाव्यंपत्तिराजांते
घ्यणिप्रसयस्साधुः। कुर्वीतविदधीत। कस्य। कीर्त्यैयशसेइतिफलनि
र्देशः। अतएवकुर्वीतेत्यत्रफलवत्कर्त्तर्यात्मनेपदविधानं। काव्यंकिंविशिष्टं

साधुशब्दार्थसंदर्भं। वक्ष्यमाणेनानर्थकत्वादिदोषेण रहितः शब्दः साधुः अर्थ
स्तु वक्ष्यमाणेन देशविरुद्धत्वादिनादोषेण विमुक्तः साधुर्भवति। ततश्च साधू नि
र्दोषौ शब्दार्थौ यस्मिन्संदर्भे स साधुशब्दार्थः। साधुशब्दार्थः संदर्भो रचना
यत्र तत्तथा। साधुशब्दार्थयोः संदर्भोपि चेति विग्रहं कुर्वंति तत्र समासप्रति
रुक्ता। यद्वा। शब्दार्थयोः संदर्भः शब्दार्थसंदर्भः साधुः शब्दार्थसंदर्भो
यस्मिन्निति विग्रहः कार्यः। साधुशब्दार्थेत्यनेन च शब्दार्थदोषप्रतिपादके
द्वितीयः परिच्छेदः सूचितः। तथा गुणाः औदार्यादयः अलंकाराश्च
चित्रवक्रोक्त्यादयः। अर्थास्तु जात्युपमादयः। तैर्भूषितं अलंकृतमि
र्थः। अनेन च तृतीयो गुणपरिच्छेदश्चतुर्थश्चालंकारपरिच्छेदः सूचितौ
तथा स्फुटाः काव्यानुकूलत्वेन प्रकटाः याः रीतयो गौडीयाद्याः पदरचना

रोषाः। रसाश्च शृंगारादयो वक्ष्यमाणास्तैरुपेतमन्वितं। अनेनचतुर्थपरिच्छेदे
रीतिप्रतिपादनं ज्ञापितः पंचमः परिच्छेदः सूचितः। प्रथममयं शिक्षापरिच्छे
दः। काव्यस्य चानेकगुणत्वेपि कीर्तेरविग्रहणं प्राधान्यख्यापनार्थम्। याव
हि कवित्वं धनं व्यवहारपरिज्ञानं अशिवोपशमं। सहृदयानां चाह्लादं करोति।
मेव च कवित्वं कांतासंमितत्वमुक्तं। कांतेव सरसतापादनेन अभिमुखीकृ
रामवद्वर्तितव्यं न रावणवदित्युपदेशं च विधत्ते इति। तदुक्तं काव्यप्रकाशे।
श्रीमंमटदीक्षेण। काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्य
परनिर्वृतये कांतासंमिततयोपदेशयुजे।१। त्रिविधं हि शास्त्रं प्रथा प्र
भुसंमितं। शब्दप्रधानं वेदादि। सुहृत्संमितं। अर्थतात्पर्यवत्पुराणादि। कां
तासंमितं चोक्तलक्षणं विशिष्टकाव्यादि इति। एतद्विपरीतं तु काव्यं विपरी
तफलमेव स्यादिति न्यक्तिरकार्यः।२। अथ कवित्वस्योत्पत्तये सामग्रीमुपदि

हेत्वाह। प्रति। सर्वं हि वाक्यं सावधारणमामनंती न्यायात्। प्रतिभैव तस्य
काव्यस्य हेतुर्भवतीति। नवनवबोधप्रकारशालिनी बुद्धिः प्रतिभा। बुद्धि
र्नवनवोल्लेखशालिनी प्रतिभा मता। इति वचनात्। ननु यदि प्रतिभैव काव्यो
त्पत्तौ बीजं तदा व्युत्पत्तिः किं करोतीत्युच्यते। तस्य काव्यस्य प्रतिभाजन्यमान
स्य व्युत्पत्तिरनेकशास्त्रपरिज्ञानं भूषणमलंकारो भवतीत्यर्थः। अभ्यास
स्तु पुनः पुनस्तदासेवनलक्षणस्तस्य काव्यस्य भृशमुत्पत्तिं करोति। इति
शीघ्रोत्पत्तिकृद्भवति। अभ्यसनेन हि मनःस्वेछे याद योगान्निर्लंबं काव्योत्प
एवं प्रतिभाव्युत्पत्त्यभ्यासानां त्रयाणामपि स्वस्वविषयः प्राधान्येन
ज्ञेयः। इति त्रिसूत्रोक्तप्रकारः पुराणकवीनां संकथा उपदेशाः।।३।। अथ ग्रंथ
रः प्रतिभां व्याख्यातुमाह। प्रस।४। प्रसन्नानि अक्लिष्टानि यानि पदानि

तथानव्याऽभिनवाऽर्थयुक्तिः ततः प्रसन्नपदानि च नव्यार्थयुक्तिश्च प्रसन्न
पद नव्यार्थयुक्तयः। तासामुद्बोधउल्लासः तं विदधाति सैवं श्रीलास्फुरंतीअ
स्वलद्रूपासर्वतोमुखं यस्याः सा तथा। सर्वव्यापिनी सर्वांगीणाचेत्यर्थः। एवं
धातुत्तमकरेवुद्धिः प्रतिभाप्रोच्यते। ४। अथ सुमतिं व्याचिख्यासुराह। शाब्द
शास्त्र शाब्दस्य प्रसेकसंबंधात्। शब्दशास्त्रं व्याकरणं। धर्मशास्त्रमागमः। अर्थ
शास्त्रं चाणक्यप्रणीतोराजनीतिग्रंथः। कामशास्त्रं। कोकवात्स्यायनादिग्रं
आदिशब्दात् छंदालंकाराभिधानचिंतामणिगजाश्वरत्नपरीक्षादिशास्त्रा
णि बौद्धादिदर्शनाभिधायकशास्त्राणि च गृह्यंते। अत्रेश्वराद्वंद्वः शब्देते
शब्दधर्मार्थकामा आदौ येषां ते शब्दधर्मार्थकामादयः तेषां शास्त्रा[illegible]णि समा
सविधिः। एतेषु सर्वेषु आम्नायः पूर्वो यस्याः सा आम्नायपूर्वा सा चार्थिक
प्रत्यय आम्नायपूर्विका गुरुपारंपर्येण लब्धेत्यर्थः। असामान्या निःसामान्य

ऋतिपत्तिः। परिज्ञानविशेषः व्युत्पत्तिः प्रोच्यते। शब्दशास्त्रे अप्रवीणोपि काव्ये
क्रियापदं विना ऽस्य निःसंज्ञायो न भवति। धर्मशास्त्रादिपरिज्ञानरहितश्च तत
संबंधेषु धर्मार्थकाममोक्षादि कार्यजातमुत्पादयितुमनात्मकः कथं कविर्भवतीति।५।
अथाभ्यासमाह। निरंतरं। गुरुपार्श्वे यः काव्यविषये रचनायां आदरो भ
वति। कवयस्तमभ्यासं विदुर्निश्चितं ते न जानंति। एतेन यः कदाचिदेकवारं
मभ्यसनमात्रं सो भ्यास एव न भवतीति ज्ञापितं। तस्य पूर्वोक्तस्याभ्यास
स्य कोपि क्रियत्मात्राः नस्म्यत्र इति भावः। क्रमः प्रकार उपदिश्यते
तमेवाह। विभ्र।०। काव्याय काव्यं निष्पादयितुं शिष्यः सर्वाण्यपि छंदांसि
शालिनीमालिनीप्रभृतीनि चवशीकुर्वीत। अवशान्यपि वशानि कुर्या
कथ्यं। पदानामावली श्रेणिस्तया। किं विशिष्टया। अर्थशून्यया। अभिधे

रहितयापीत्यर्थः। तथा। बंधस्य संदर्भस्य चारुत्वं मृदुपदपद्धति योग न मनो
रसाविभ्रत्या धारयंत्या। यादृशो हि प्रथमम भ्यासस्तादृशी पुनः न निष्पत्तिरि
विशिष्ट काव्यार्थिभिरभ्यासोपि सुललितपदशय्या माधुर्य विशिष्ट एव वि
अत्र चोदाहरणमुच्यते। देवश्रेणीकीर्तिविस्फूर्तिश्रेणी धर्माधर्मप्राप्तये ध
न्यः। विश्वाधानं मन्यमानः समानं मोहस्नेहारोहिणी वप्रदीपा॥ इति शा
न्यभ्यासोऽर्थसंबंधशून्यपि शब्दश्रेण्या॥ एवं सर्वाण्यपि छंदांसि साध
निरर्थकैर्वाशब्दैर्बंधैरभ्यसनीयानि इति। ७। अथ बंधचारुत्वमेव कथं भव
त्याह। पश्चा। संयोगवशात् मार्द्धो सवर्णस्य गुरुत्वं कार्यं। एवं हि बंधस्य दार्ढ्यं भ
वति। तथा विसर्गलोपो न कार्यः। यतो विसर्गाणामवस्थाने न काव्ये ओजो
गुणउपजायते। तथा विशब्दो विरूपत्वेऽभावे च वर्त्तते। यथा। क्षिखरोयं गमय
नः। विमदो मुनिरयमिति च। ततोऽत्रापि विरूपः संधिर्विसंधिः। यद्वा। नसं

धिर्विसंधिरिति विरूपसंधेरसंधेश्च वर्जनं कार्यं। एवंप्रकारेपि। अन्येपि उपदेश
दि। क्लिष्टपदवर्जनादयो बंधचारुत्वस्य हेतवो भवंतीति प्रकारार्थ एवंशब्दः सूचयति।
अत्रोदाहरणं यथा। भूपी ययस्याः क्षितिरक्षिणः कथास्तथेति। इदमुदाहरणम
न्वयेऽप्युक्तं। व्यतिरेके तु ग्रंथकार एवोदाहरति। ८। शिते। ० नृणामधीशाः तत्संबोध
नं हे नृधीशा नरेंद्र त्वया शितं तीक्ष्णं खड्गं धारिते सति अत एव रणसंग्रामे घोरे रौद्रे रू
पा कृते सति क्षितिपाः प्रस्तावात् शत्रवो नष्टाः पलायनवान एव गताः। नक्षणमपि
स्थिता इति भावः। जवात् वेगात्। अनेन सांतिम्रायंमसंयमज्यते। अत्र विधृते ख
ड्गादि संयोगवशात् पूर्वस्य गुरुत्वं नास्ति। किं तु सहजं विभक्तिरुक्तं। नृधीशे
विरूपः संधिः क्षितिपा भीयित्यत्र विसर्गाणां लोपोऽस्ति। एवमेभिर्दोषैरस्मिन्
पि न्यादिश्यते नास्ति बंधचारुत्वं। अतो विशिष्टकाव्यार्थिभिरभ्यासोपि बंधा
त्वोपेत सैन पदावल्या कार्य इति। स्थितं।९। अथार्थविशेषं विनापि पद्यबंधाभ्या

अनुल्लसंत्या। शिष्यः। कविरर्थसंकलनात्त्वं अर्थस्याभिधेयस्य संकलनात्त्वं संघ
टनारहस्यं पद्यबंधविधिलक्षणं संकथास्वपि परस्परालापेष्वपि अभ्यसेत्। कर
सस्याभित्याह। नव्यार्थयुक्तौ अभिनवार्थयुक्तौ अनुल्लसंत्यां अस्फुरंत्यां अभि
नव्यार्थयुक्तेर नुल्लासः कुतस्त्याह। अभिनवत्वतः कवेर्नवीनत्वादित्यर्थः
शो दाहरति। यथा। यथेति दृष्टांतोपदर्शनार्थः। आगम्यतां। हे मित्र त्वया आगम्य
या प्रस्तावात् मां आलिंग्य आश्लेषं कृत्वा अत्र स्थाने त्वं निषीद उपविश। आलि
ति पाठे तु। सखे त्वं मां आलिंगय मम आलिंगनं कुर्वित्यर्थः। तथा। यन्निजभ्रातृजाय
निजभ्रातृमल्लक्षणस्य जायया अथवा निजया भ्रातृजायया संदिष्टमस्ति। स्व
भ्रातृजायया यः संदेशो ज्ञापितोऽस्तीत्यर्थः। तत्संदिष्टं निवेदयत्वं। ननु भ्रातृजाय
येति कथं सिध्यति। एतयोस्त्रयोर्नि संबंधसद्भावात्। ऋतो विद्यायोनिसंबंधेभ्य इति
सूत्रेण षष्ठ्या लुक् प्राप्ते भ्रातुर्जायेति अलुक् समासः प्राप्नोति मातुःष्वसृ स्वसादिवत्।
उच्यते। भ्रातेव भ्रातावयस्य इत्यर्थः। ततश्च भ्रातृशब्दस्य मित्रार्थत्वाद्योनि संबंध

स्याभावात्। अलुप्समासस्याप्राप्तिः। तथा चैवंकारोभणितीमप्रमानेनसहप्रात्व
मस्ति। न खिलत्वमस्ति। ११। ननु यदि निव्यार्थसुनि कैर्मोल्लसति। तदापरकाव्यार्थमो
दाय किमित्यभ्यासो न विधीयते। सातंकापनोदार्थमाह। परार्थ। चत्रा बंधो त्र पुनरर्थे।
यः पुनरभ्यासः परेषां कवीनां गृहीतार्थस्य संबंधात्संबंधात् भवेत्। अभ्यासः।
किं विषयं रसाल। वाच्यस्यार्थस्य संगतो घटनायामित्यर्थः। अत्र विषयसप्तमी
ज्ञेया। अर्थसंबंधविषये योभ्यासो भवतीति भावः। सोभ्यासः श्रेयान् प्रशस्यो
भवति। यस्मात्कृतो रभेनपदार्थबंधनेन। अथवा। अथवा परार्थबंधनात् क्रियमा
नार्थविषयाभ्यासेन कविः काव्यकर्ता तस्करः वनस्करतुल्यो भवति। वाच्यसं
विति प्रतिपादनात् शब्दसंगति विषयोभ्यासः परेतो गृहीतो न स्तैन्यं न स्त
ति। यथा। परार्थसंबंधप्रसक्तः कविः सुखमग्नो नाभिनवार्थोत्तम येत्किर
तनश्च परार्पितवर्ण्यविशेषवर्णनायामशक्तः सन्नुपहास्यः स्यात्। कीर्त्यर्थं
काव्यविधानं विपरीतफलमेव प्राप्नुयादिति। समस्यायां पुनः परार्थग्रहणं नदो।

विशेषतस्तथा वैदूष्यातिशयदर्शनादिति तथैव चाह ॥१२॥ वर ॥०॥ समस्यायां पर
काव्यग्रहेऽपि विशिष्टबुद्धिप्रकाश लक्षणगुणहेतुत्वाद्गुणः स्यात्कवेः काव्यकर्तुरि
त्यर्थः ॥ अत्र परकाव्यग्रहणेन परकाव्यस्यैकोद्वौ त्रयो वा पादा यावद्ग्राह्या नतु संपूर्ण
व्यम् ॥ परकाव्यस्य गुणत्वहेतुमाह ॥ हि यस्मात्कारणात् असौ समस्यापूरकः कविः तस्य
काव्यस्य योऽर्थः तस्यानुगतं अनुयायिनमनुकूलमर्थं अश्रुतपूर्वं नवं निजप्रतिभाप्रा
लभ्येन अभिनवं रचयति ॥ एवं च समस्यापरकाव्यार्थमपि निजनिर्मलबुद्धिबलोल्लासादि
भिनवार्थेन योजयन् कश्चिदलंकारकारको भवतीति ॥ समस्योदाहरणं यथा ॥ केनाप्येक
पादोर्पितः ॥ कज्जलं जयति कुंकुमोपममिति ॥ एतदर्थसंगसंघपादत्रयं नवं विधेयं ॥
यथा ॥ जानती भगवता भवं हृतं पार्वती पतिहतिं भ्रमाद्रुषा ॥ रक्तमश्विविद्धेरु चास्यत
कज्जलं जयति कुंकुमोपमम् ॥१॥ स्वमिदं ॥ राज्ञार्पितं पादत्रयं कुमारसंभवस्य ॥ ए
षक्कु सर्गसक्तं यथा ॥ चकार मेना विरहातुरांगी प्रवालशय्या शयनं शरीरं ॥ हिमाल
यो नाम नगाधिराज इति तुर्यपादेन पूरणं ॥ चकार मेना विरहातुरांगी प्रवालशय्या

शरणं शरीरं। हिमालयो नाम नगाधिराजोऽत्तवप्रतापज्वलनैनुगालैः। इत्यादिस्वयंज्ञे
यं।१३। अथ काव्यनिर्मितिमर्थोत्पत्तये सामग्री माह। मनः।०। सकलाधिविगमात् मनः
प्रसन्नता। बुद्धिर्नवनवोल्लेखशालिनी प्रतिभा मता। प्रातःकालस्योपलक्षणत्वादपररा
त्रादिवेलापि ज्ञेया। तत्र हि मंदमेधसोऽपि मेधा प्रसीदति। अभियोगउद्यमोऽस्यास्तीति इ
त्र। तद्भवोभियोगिता। नानाशास्त्रदर्शनशीलत्वं च। अत्र समुच्चयार्थश्चशब्दो विग
म्यते। यथात्र। अहरहर्नयमानो गामश्वं पुरुषं पशुं। वैवस्वतो न तृप्येत् सुराया इ
दुर्मदी।१। इति पूर्वार्थोक्ताः श्लोकस्य हेतवो भवंति। किंचनरम्यवस्तुपरीवारं दृष्ट्वा बु
विशेषणैः वाक्येर्वा सुकविर्भूयात् उत्तरार्द्धोपमादिभिः।१४। अथ समुत्पन्नस्या
निवेशनविषये शिक्षामाह। समा।०। कविरर्थस्य प्रकाशनं पूर्वार्द्धं काव्यं समाह
समासप्रायं विदध्यात्। तुल्यसमासमेव। उत्तरार्द्धे उपमाद्यर्थांतरन्यासांतं प्रव
र्थस्फुरणं कार्यमित्युक्तं पूर्वं। पुनः शिक्षांतरमाह। तत्पुरुष इति। कुर्यादिति क्रिये
वर्त्तते। तत्पुरुषश्च बहुव्रीहिश्च मिथः प्रत्ययमावहत इति मिथः प्रत्ययावलोपरस्प

प्रतीतिकारकोन कुर्यादित्यर्थः। यथा। वृत्रशत्रुरित्युक्ते वृत्रः शत्रुर्यस्येति बहुव्रीहौ सत्यपि
वृत्रश्चासौ शत्रुश्चेत्यत्र तत्पुरुषभ्रान्तिः स्यात्। एवं वीरपुरुष इत्युक्ते वीरश्चासौ पुरुष
इति तत्पुरुषे सत्यपि। वीराः पुरुषा यस्मिन् [illegible] ग्रामे इति बहुव्रीहिप्रतीतिः स्यात्। एवं
न कार्यं। ननु वृत्रश्चासौ शत्रुश्चेत्यत्र वीरश्चासौ पुरुषश्चेत्यत्र च कर्मधारयसंज्ञ
पुरुषस्य भ्रान्तिरयुक्ता प्राप्नोतीति चेन्नैवं। कर्मधारयसंज्ञाधिकारे तत्पुरुषसं
अपि शब्दैः प्रतिपादनात्। ततः कर्मधारयस्तत्पुरुषसहचर एवेति तत्पुरुषप्र
रुक्ता। अत्तुष्टुभिस्स नोन ध्यावि इति वचनात्। निषिद्धोपि मूलोकात्। भगणपातस्तत्पु
षबहुव्रीहिर्हि यत्र न विरुद्धः स्यात्। अस्य शिक्षाशास्त्रत्वादिह तु सिः। ९५। पुनः शि
क्षान्तरमाह। एकाणकविरेकस्यैव एकस्यापि अभिधेयस्यार्थस्य समासं लघुनिश्छं
द सि संक्षेपं व्यासमेव च विस्तरमपि कर्त्तुमिति धातुं अभ्यस्येत् शिक्षयेत्। लघुछंद
स्यार्थस्य संक्षेपं कर्त्तुं अभ्यसेत्। प्रौढछंदसि अर्थस्य विस्तरमपि कर्त्तुमभ्यस्येत्॥
तथा कविरभ्यसेत्। किं कर्त्तुं आधानं कर्त्तुं अर्थस्य स्थापनं कर्त्तुं। कासु। निःशेषा

लं क्रियासु सर्वा लंकारेषु। अयं भावः। सर्वेष्वपि अलंकारेषु उपमादिषु एकस्याप्य
र्थस्य स्थापनं कर्त्तुं चाभ्यासो दृश्यते॥ श्लो॰ अस्यैवार्थस्यापि लघुछंदसा समासेन। य
था। दक्का ध्वनि श्रुति ध्वानस्तु स्वरास्त दिङ्मून भयात्। लीयमाना निकुंजेषु बारयंती
व पर्वताः॥१॥ अस्यैवार्थस्य व्यासो यथा॥ यात्रारंभ भयानकानकशत ध्वान प्रतिध्वा
निताः स्वस्योच्छेद पराभवागमममी संभाव्य शंकाकुलाः। आसीदेव शरण्य वसंत मे
धुनात्वद्वैरिराजप्रजं दूरादेव निराकरिष्ठ वद्भव स्वामिन्नविमांसइयः॥२॥ अथवा
ज्योत्स्नागंगापरब्रलदुग्धधारासुधांबुधिः। हाराश्चापि न रोचंते रोचंयदि तेयशः।
अयं समासः। अस्यैव व्यासो यथा॥ ज्योत्स्नास्निग्धा नेनोवाहरति हर शिरोम
णी हृत्तरं एयानंदप्रलरम्यं भवतिनमधुरानाप्यसौ दुग्धधारा मुग्धा दुग्धांबु
विलसति लहरी हारिण्योवानहाराः प्रसन्नाः स्वर्णशृंगां गणामणिवरणाः कीर्त्ते
रल्पदीयाः॥२॥ स्व। तथा निःत्रोषालंकारेषु अर्थाधानक्रिये भ्यासो यथा॥ तुरदं

मस्याः सुंदरमिसे तावन्मात्रोर्थः मुखकमलं सुंदरमिति रूपके अधीयते। अस्यामु
खे षट्पदाली कमलबुध्या निपततीति भ्रांतिमलंकारे। अस्या मुखे घटिते पि धात्रा चं
द्रः किमर्थं निष्पादित इत्साक्षेपे। इदमेतस्या मुखमथवा पद्ममिति संशयालंकारे। इ
मुखं न किंतु कमलमिति सपन्हुतौ। अनलंकृत सुभगमस्याः स्त्रियो मुखमिति वि
वनायां। अस्या मुखस्य वदनेंदुकांतिभिर्निराकृते विलासभवनतमोभरे न स्मरति
दीपं परिजनस्त्यतिशये। एवमन्येष्वपि अलंकारेषु स एक एवार्थो न्यस्तनीयः। १
अथ काव्यकर्तॄणां विशेषं ज्ञापयति। स्यादन। व अर्द्धस्यांतः अर्द्धांतः पादस्यांतः पादां
तः अर्द्धांतश्चासो पादांतश्च अर्द्धपादांतः न अर्द्धांतपादांतो ऽनर्द्धांतपादांतः। अथवा।
अनर्द्धश्चासौ पादांतश्चेति समासविधिः। आस्तांतावत् अर्द्धांतपादांते अर्द्धांत
रूपपादांते लघुर्वर्णो गुरुर्भवतीति न। किंतु। अनर्द्धांतपादांतेपि प्रथमतृतीयपाद
ांते लघुवर्णो गुरुर्भवति। कस्मिन् सति। अशैथिल्ये सति। शिथिलस्य भावः शै
थिल्यं न शैथिल्यं अशैथिल्यं तस्मिन् बंधस्य दृढत्वे सतीत्यर्थः। तथा। तुष्यनम

स्त्रिभुवनार्त्तिहराय नाथ तुभ्यं नमः क्षितितलामललक्षणाय। तुभ्यं नमस्त्रिजग
तः परमेश्वराय तुभ्यं नमो जिन भवोदधिशोषणाय॥१॥ एवं विधेषु वसंततिलका
इंद्रवज्रादिषु छंदःसु बंधस्य दृढत्वे सति प्रथमतृतीयपादांते पि लघुर्गुरुर्भवति॥
न पुनर्मालिनीप्रभृतिषु बंधस्य शैथिल्यसंभावात्। तथा बुधैः पादस्यादौ वाद्या न
वाच्याः। यथा च। नौमि नेमिं सुबुद्धिं विधिं सुपार्श्वं विमलं जिनं मिस्या। दिप्रयोग ग्रहणात्
रे धिक् हां किं नं आः प्रभृतयो न दुष्टाः। यथा। रे राक्षसाः कथयत क्व स रावणा रव्ये
रत्नं रवींदुकुलयोरपहृत्य नष्टः। इति। यां चिंतयामि सततं मयि सा विरक्ता
प्यन्यमिच्छति जनं स जनोन्यसक्तः। अस्मत्कृते च परितुष्यति काचिदन्या धि
तां च तं च मदनं च इमां च मां च॥१॥ इति। आः सर्वतः स्फुरति कैरवमपि बंदि
स्ना कषायमधुना मधुनाः चकोराः। जातोथ सैष वरमाचलचूलचुंबी पंके
रुहाकर जागरणप्रदीपः॥ इत्यादि स्वयमभ्यूहनीयं॥१७॥ अथ यकविसमयं शिक्ष

माह। अत्रानुक्तोऽपि कविसमयो यथा। कामो मू। र्त्तोमूर्त्तश्च वर्ण्यते। स्त्रीणां कृष्णा
क्षाः श्वेताः श्यामा वा। स्त्रीलोचनानि धवलानि श्यामानि वा। क्षीरसमुद्रः क्षारस
मुद्रश्च एक एव। नीलरक्तयोरैक्यं। वसंते मालतीनां विकासो न इत्यादि कविसम
भुव॥ कविर्विश्वानि काव्ये त्रीणि वध्नीयात्। स्वर्गमर्त्यपाताललोकभेदात्। अथवा स
यथा। भूर्लोकः १ भुवर्लोकः २ स्वर्लोकः ३ महर्लोकः ४ जनोलोकः ५ तपोलोकः ६ स
लोकः इति ७। यद्वा चतुर्दश। यथा सप्त पूर्वाण्येव। तलं १ वितलं २ सुतलं ३ नितलं
तलातलं ५ रसातलं ६ पातालं ७ इति मतांतरेण भुवनानि। एकविंशतिरपि
तथा। यद्यपि शुक्लत्वादयो गुणा मूर्त्तिमद्द्रव्याश्रयाः। तथापि कीर्तिमदृश्यामपि
अमूर्त्तामपि। सितां श्वेतां निबध्नीयात्। अदृश्यामपि अकीर्त्तितलः श्वेतकी
र्तेरन्यथा। अपरप्रकारां असितां कृष्णामिसर्धः निबध्नीयात्। १८। वारणाम्॥
यद्यपि हस्तिनां वर्णः कृष्णः तथापि सुरेंद्रस्य गजं शुभ्रं कीर्तयेत्॥ तथाग्निस्तुरं
गमाणां लोहितो वर्णः। सूर्यतुरंगाणां नीलो वर्णः। इंद्र तुरगस्य कर्बुरो वर्णः श्चय

अंबुधीन् वर्णयेत्। कृति। चतुरः चतुःसंख्यान्। पूर्वपश्चिमदक्षिणोत्तरसमुद्र ४
भेदात्। सप्त वा। लवण १ क्षीर २ दधि ३ आज्य ४ सुरा ५ इक्षु ६ स्वादुवारि ७
समुद्ररूपात्। लोकप्रसिद्धात्। तथा ककुभो दिशाः। कीर्तयेत्। कृति। चतस्रः। अ
थवाष्टौ। पक्षाद् दश। न सर्वत्रापि दश। किंतु क्वचित्स्थाने काव्योपयोगिनि। पूर्व
पश्चिमदक्षिणोत्तरभेदात्। चतस्रो दिशः। चतसृणां विदिशां प्रक्षेपात् अष्ट
ऊर्ध्वदिक् अधोदिक् प्रक्षेपात् दशापि दिशः। अत्रोदाहरणानि तु लेषु स्थाने
स्वयं ज्ञेयानि। १९। पुनः शिक्षामाह। यमक। ० यमकालंकारे श्लेषालंकार
त्रालंकारे वकार बकारयोर्न भिदा। न भेदो भवति। पुनः कयोः डकार लकारयो
था। अनुस्वारश्च विसर्गश्च चित्रस्य हार बंधच्छत्र बंधादिरूपस्य भंगा
घाताय न संमतौ न कथितौ विसर्गः। २०। अथ क्रमेणोदाहरणानि। यमके
वयोर्डलयोरभेदो यथा। शंकमानैरिति। हे महीपाल क्षितिपाल त्वद्वैरिभिः

नं श्रितं। किं विशिष्टं। बहूनि बिडालैर्निबिडा। निःसपत्नि विवर्जिनि यत्र तत्। सह
पत्नीभिर्वर्त्तंतइतिसपत्नीकाः तैः किं कुर्वाणैः शंकंतइतिशंकमानास्तैः। किंकुर्
तवकारारूपअगारेविडंबनंगुप्तिगृहेकदनर्थनमित्यर्थः। काराचासौआगारं
कर्मधारयः। अत्रश्लोकेयमकालंकृतौविलंबनंवकुविरलंवनंइतिबवयोर्डल
भेदः। २१। श्लेषेबवयोरभेदोयथा। तया। ०। स्वामिन्नरिपूर्णाबाणाःशिशवोनः
त्वयासंमिताः। नकेवलंतयानवद्धाबंदीकृताइत्यर्थः। किंतुतेषांरिपूर्णांकामिनी
पिबालाः नसंयमिताः अत्रबालाःकेशगनबद्धाइत्यर्थः। तयालदयोर्डणसता।
संयमिताः नकामिनीभिस्तुभर्त्तृवियोगिनीभिः सतीभिर्नबद्धाइति। बालाःशिशा
वश्चकेशाः किंविशिष्टाः मुहुर्महीपालविधूसरांगाः। मुहुर्वारंवारं मह्यांभूमौपातेन
पतनेनविधूसरं विशेषेणधूसरं धूलिमिश्रं अंगंशरीरं येषां। तथा। अत्रबालबा
लशब्दयोर्बवयोरैक्यं। २२। श्लेषेडलयोरैक्यं। यथादेव। ०। हेदेवराजन् अनेका
र्थनाममालायांदेवशब्दोराजार्थेप्रास्तियुष्माकंयशःसारंत्रिंशत्तोलनुवर्णधितुं

त्वदीयाभक्तिर्मां उत्कंठयति उत्सुकं करोति। एनं इमं प्रत्यक्षं मां किं विशिष्टं। जडः
आत्मा यस्य स जडात्मा। जडात्मैव जडात्मकः। स्वार्थे कः। इंदोर्लेखारेखासाग
रं उत्कंठयति उल्लसितं करोति। सागरमपि किं विशिष्टं जडात्मकं। जडं नीरं आत्मा
स्वरूपं यस्य स जडात्मकः। तं तथा। अत्र जड जल शब्दयोरैक्यं॥२२॥ अथ चित्रे डल
योरैक्यं यथा। चंद्रे डितं। अहं देवं पश्यामीति संटंकः। किं विशिष्टं। चंद्रेण सकलज्यो
तिश्चक्रस्वामिनाईडितः स्तुतिः। पुनः किं विशिष्टं। चडुलितस्वरधीतसाररत्ना
सनः स्वरशब्दोऽव्ययमिति। स्वः स्वर्गेऽधीतो विख्यातो मेरुरित्यर्थः। तस्य सा
प्रधानं रत्नासनं रत्नमयं आसनं पांडुकंबलशिलास्थितं चडुलितं च चलितं
स्वरधीतस्य मेरुशैलस्य साररत्नासनं येन स तं। श्रीवीरेणामेरोःकंपन
आसनमपि कंपतेऽइति। अथवा। स्वः स्वर्गेणास्य गवासिदेवजनेन अधीते
तं व्यावर्णितं सारं बलं यस्य स स्वरधीतसारः। इंद्र इत्यर्थः। चडुलितं कंपितं
स्वरधीतसारस्य इंद्रस्य [redacted] रत्नासनं येन स तं॥ परमेश्वरस्य [redacted]

३ तिमिर

कल्याणके बुद्धानां सिंहासनानि कंपंते । रभसेन वेगेन कम्पितं छिन्नं शोक
जनितं अस्माधि सम्हो येन सः तं । पुनः कथंभूतं । पापान्येव तिमिराणि पापति
मिराणि तेषां क्षयं करोतीति पापक्षयकारः पापतिमिरक्षयकारः कायो देहो ऽस्य
सतं । अल्पेतरं च तत् अमलं च अल्पेतरामलं अल्पेतरामलं च तत् तपश्च ।
अल्पेतरामल तपसे । कचलोपं । कचानां लोप अपनयनं लोचयति दर्शयतीति अल्पे
तरामल तपः कचलोप लोचस्तं । अत्र चंद्रेति तच्छुलितशब्दयोः डलयोरैक्यम् । इद
यं हारमालिरव्य वाचनीयम् । चित्रे बवयोरैक्यं । यथा । प्रचंडबल ॥ ० ॥ प्रचंडं
क्रूटं बलं वीर्यं यस्य स संबोध्यः । निर्गतः कामात् कंदर्पात् । निष्कामः तस्यामंत्रणं निष्का
मेत्यत्र निर्दुर्बहिराविःप्रादुश्चतुराम् इत्यनेन सूत्रेण निरशब्दस्य रेफः षो भवति । परत्र
वा कुलकात् चित्रार्थं यकारो न कृतः तेन विसर्ग एव निःकाम इति । महांश्चासो आग
मश्च प्रकाशिता महागमा येन स संबोध्यः । भावः अभिप्रायश्चित्तमित्यर्थः । तस्य त
त्वानि अंतरंगतत्वानि तानादीनि तेषां विधिरिव निधिः तस्यामंत्रणं हे देव । भावप्रभा ।

अलं अतिशये न अत्र विभ्रत्रयेपि अद्भुता आश्चर्यकारिणी अस्ति अस्ती
ति क्रिया अनुक्तापि गम्यते। यत्रान्यत्। क्रियापदं न श्रूयते तत्रास्ति र्भवतीति
परः प्रयुज्यते इति वृद्धवचनसामान्यात्। अत्र भाव[illegible]बलेन शब्दयोरैक्यं। तच्च
च्छत्रसंस्थापनायां स्वयं ज्ञेयं। तथा तद्विदितमिसत्र अनुस्वारेण चित्रभंगेन। निः
कामदस्य त्रिसर्गाभ्यां न चित्रभंगः। भवकाननमतेन भग्न मायालमः प्रभ
विनयात्तांस्तुवे वीरविनतत्रिदशेश्वरं। इदमपि छत्रकाव्यं चिह्नरूपेण
अथ पूर्वोक्तमेवार्थमुपसंहरन्नाह। अधी। ॰ अभियोगस्य उ
योगात् शास्त्राणि धर्मशास्त्रप्रभृतीनि अध्ययनपूर्वं अधीत्य अर्था
नि च अर्थपदानि तेषां प्रपंचः अभ्यासे नवत्रयोवत्रावत्तर अर्थपदप्रपंचः
र्थप्रपंचो यस्य सतं। तं प्रसिद्धपूर्वकविप्रयुक्तं। कवीनां समयं कविप्रसिद्धानां दृ
त्वा। उक्तं च। असतोपि निबंधेन निबंधेन सतोपि च। नियमेन च जात्यादेः कवीनां

तथा मनसश्चित्तस्य प्रसन्नत्वे सती सर्थः। कवेः कर्म कविता कवित्वं तां विदध्यात्कुर्यात्।
२८। इति वाग्भटालंकार व्याख्यायां सिंहदेव कृतायां प्रथमः परिच्छेदः॥१॥ अथ काव्य
शरीरं दर्शयन्नाह॥ संस्कृतं। तस्य सर्वप्रस्तुतस्य काव्यस्य एषांचतस्त्रो भाष
यत्वं शरीरतां प्राप्नुवंति चतस्त्रोपि भाषाः काव्यशरीरप्रायाः इत्यर्थः।१। अथ
चतुष्टयं स्पष्टयति। संस्कृतं। देवानां भाषा संस्कृतं भवति। किंविशिष्टा। शब्द
षु व्याकरणेषु निश्चिता। सम्यक्कृत्युत्पत्त्या निर्णीता। प्रकृतेः संस्कृतात् आग
तं। अनेकधा नेकप्रकारैर्भवति। तज्जं च तत्तुल्यं च देश्यं च तज्जात तुल्य
श्यानि तानि आदीयस्य तत्तथा। तस्मात् संस्कृता ज्जायते स तज्जं। यथा॥ सि
रि [illegible] सिंधुराय सद्धांं साहस इति उत्तिकित्तणं कुमणं। कष्टमन्नहामणं मह
तपमयण छमदवमसि।३। हे श्री सिधुराज जय सिंहदेव। तव साहस रसिक
रतिकीर्त्तनं सस्समस्ति। अन्यथा कथं मनो मम आक्रामसि। मनः किंभूतं
श्रीसिधुराजसस्सं साहसरसिकरतिकीर्त्तनं कुर्यं कथमन्य
थाम नोममनपतन्मदनास्त्र माक्रमसि।

पतंनिमदनास्त्रा णिस्मरबाणाय त्रतत्। अत्र संस्कृतशब्दा एव प्राकृते भ
णाइ त्ति तज्जं। तेन संस्कृतेन तुल्यं तत्तुल्यं असंस्कृतमित्यर्थः। उदाहर
णं यथा। संसारदावानलदाहनीरं इत्यादिस्तुतयः। अत्र प्राकृतेपि संस्कृत
शब्दाः नान्यथा भवंतीति देशो भवं देश्यं। यथा। सज्जावी संज्जो अणकुरे
पसरो जाव अज्ज विन होइ पडिहं धवि गलवइ वयणेता व उज्जो उज्जाण।
अत्र सत्तावी संजो अण शब्दो देश्यः सम्यग्गर्थो। तस्य किरणप्रसरो यावल्ल
घापि न भवति। पणिहसन्ना शब्दोपि देश्यः संपूर्णार्थः। गलवइ शब्दोपि
स्वंडार्थः। ततोहि संपूर्णमंडलचंद्रवदनेतावत्व उद्यानं व्रजइति। आ
दात् शौरसेनी भाषामागधी च गृह्यते। यतः शौरसेनीमागध्यो
स्ताद्दल्प एव भेदः। शौरसेनी यथा। इदानीं शब्दे ड लोपः। जंडाणिंदुब

लाअहयं। तंछब्रस्य ताताए हि। एवशब्दस्यापि वइहस्येवं ननुशब्दस्य णंणंभणामि
लुमं। अम्महेशब्दो हर्षे। यथा। अम्महे एअस्मावल्लहा जणो। हिदृषिकादीनां हर्षे ही ही
भोइति शब्दः। ही ही भोए नेसरू जंपरस्सादि। मागधी भाषायां अकारांतस्य से
ए भवति। असेवल्लहे तथा। अहं शब्दस्य वयं शब्दस्य च हगे भवति। यथा। हगे
गद। तिष्ठतेः तकारस्य चकारः। चिष्ठदुमं। तथा। रकारस्य लः षाकारस्य च
रूणास्स्थाने तल्लुनर ति। रूक्षस्स्थाने लुरक। इत्यादि। एवमनेन प्रकारेणानेकधा
रूतं ज्ञेयं।।२।। अपभ्रंशभाषामाह। अपभ्रंश। अपभ्रंशः पुनर्भवति सइति स
यं गम्यते यत्कुले षुत्रेषु कर्णाटपांचालादिषु देशेषु शुद्धं। अपरभाषा। भेरमिश्रितं
भाषितं सोपभ्रंशो भवतीत्यर्थः। इहकचित् अभूतोपि रेफो भवति। यथा। भ्रांरउ
लुह अभि[illegible]र ग्रां उत्तं अउ। दीसहसच्चुघ्रदंदु। कहिमा कहिइ अहआ। विरसइ।
अहलं केरउ कूलु।।१।। पैशाचीमाह। पभ्रुतेरुच्यते किंचित् तन्नैतिकमिति स्मृतम्।।
यत्किंचित् भूतैः पिशाचैरुच्यते जल्प्यते। तन्नैतिकं। पैशाचिकं इति कथितं भूता

१९ नामिदं भौतिकं। अत्र दकारस्य तः। यथा मालुतेवत्तेव नमत्। मारुत्वं देवनमतयू
यमिस्यर्थः। हृदयस्य यकारः पकारो भवति। यथा। हितपंकं परईरस्य लः। यथा। लु
हा रोइइ सर्थः इत्यादि। ३। अथ वाङ्मयस्य द्विप्रकारत्वमाह। छंदो।०। तत्र सिद्धं वा
चां विकारो वाङ्मयं द्विधा द्विप्रकारं भवति। एवं मात्रावर्णगणलबंधात् छंदसा बद्धं छंदे
निबद्धं अपरं च अछंदः छंदो रहितं। आद्यं छंदो निबद्धं पद्यं कथ्यते। तदन्यच्छंदो विहीनं
गद्यं कथ्यते। तयोर्द्वयं तद्द्वयं छंदो निबद्धं। छंदसा द्वयं मिश्रं कथ्यते। गद्यपद्यरूपं
मं अचंपूरिति मिश्रितं। गद्यपद्यमयी चंपूरिति वचनात्। मिश्रं च नाटकादिषु चे
घूच भवति।४। काव्यदोषपरिहारार्थमाह। अदुष्टं।०। तत्काव्यं अदुष्टमेव। दो
तमेवं कीर्त्तिनिमित्तं भवति। किं विशिष्टायै कीर्त्यै। स्वर्ग।०। स्वर्गरूपस्य आवा
सोपानपंक्तिः तस्यै। यथा सोपानपंक्त्या प्रासादे उच्चैस्तरे आरुह्यते तत्प्राकी
पसोपानश्रेण्या कवयः काव्यकरणेन स्वर्गलक्षणं तुंगप्रासादमारोहंति।
कविकीर्त्तेः स्वर्गेपि विस्तीर्यमाणत्वात्। अतः कारणात् परिहार्यान्परिहारयोग्या। १९

दोषान् तान्स्र सिद्धान् आदौ धुरि प्रचक्ष्महे। कथयामो वयं।५। तत्र। काव्यदोषास्त्रिविधा भ
वंति। पददोषाः वाक्यदोषाः वाक्यार्थदोषाश्च। तत्र प्रथमं पदविषयान् दोषानाह। अ
नर्थकं० ग्राम्यं। सुगमं। न विद्यते अर्थः प्रयोजनं यस्य तत् अनर्थकं निःप्रयोजनम्
श्रुतौ श्रवणे कटु श्रुतिकटु यत् श्रवणे कर्कशमित्यर्थः।२। व्याहतो विरुद्धः अर्थो य
स्य तत्। व्याहतार्थं विरुद्धार्थमित्यर्थः। न विद्यते लक्षणं शब्दशास्त्रव्युत्पत्तिर्यस्य तत् व
रणाहीनमित्यर्थः। स्वसंकेतेनैव न परसंकेतेन प्रकल्पितः अर्थो यस्य तत्तथा। स्व
प्रायकल्पितार्थमित्यर्थः।५। शास्त्रे क्वचित् प्रोक्तमपि यत् न प्रसिद्धं विख्यातं। तद
सिद्धं। असंमतं न अभिमतमित्यर्थः।७। ग्रामे प्रसूतं तत्र भवं ग्राम्यं। ग्रामीणजनवच
न तुल्यमित्यर्थः। एवंविधं यत् पदं प्रजायते प्रादुर्भवेत्। तत्पदं शब्दपदं न प्रयुज्यते।
काव्येषु तादृशस्य पदस्य दुष्टत्वात्। अत्रापवादमाह। क्वचिदिष्टाश्चेत्यादि क्वचित् केषु
चित् अनुवादोपहासार्थेषु विद्वद्भिः पूर्वाचार्यैः। एषामपि पूर्वोक्तदुष्टपदानामपि अ

पदोषतायृष्टं निर्दोषताऽत्र निपादिताऽस्त्यर्थः। यथा। मुखं चंद्रश्रियं धत्ते श्वेतश्म
श्रुकरांकुरैः। अत्र हास्यरसोद्देशो ग्राम्यत्वं गुणतां गतं। १। हास्यरसावतारादित्यत
वे ग्राम्यादिपदान्यपि गुणाय भवंतीति भावः। ६। ७। तत्र प्रथमं अनर्थकमाह। प्रस्तु०।
प्रस्तुते शारध्यार्थयत् अनुपयुक्तेन सुपदे युक्तं अनुपयोगि भवतीति तदनर्थकमुच्य
ते। उदाहरणमाह। यथाविनायकं। यथात्राब्दोहदशांतोपन्यासार्थः। अत्र लंबोदर पद
हितु इति च सर्वं अनर्थकं यतः। यत्स्वरूपमात्रवाचकं पादपूरणमात्रं च यत्तद
मपि अनर्थकं ज्ञेयं लंबोदरपदं स्वे हि रूपमात्रवाचकं। हितुपदे तु पादपूरणम
र्थं। अतोऽनर्थकापि तथा वंदे इत्यत्र वर्त्तमानार्थे एकवचनस्य एकारस्य प्रयोगाद
मित्यपि स्वयं लभ्यते। अतोऽहमिति पदमपि पुनरुक्तत्वादनर्थकं ज्ञेयं। प्रयोजन
यां तु अहमपि पदं प्रयुक्तेनार्थकमिति। अत्र शिष्य आह। ननु लंबोदरपदं गुण
प्रतिपादकं ततः किमनर्थमनर्थकं। इति न वाच्यं। विनायकशब्देनैव तत्कार्यत्वात्
रुक्तत्वदोषः स्यादिति पुनरुक्तदोषस्यात्र निषिद्धत्वात्। अत्रोच्यते। पुनरुक्तदोष०

अनर्थत्वेऽपि न भवति। येन पुनरुक्तदोषम[illegible]नैव[illegible] एकदोषात् पृथक् निषेधंति।
तेऽपि पदार्थप्रतिपत्तौ जातायां पदांतरस्य प्रयोगमनुपयोगिनं मन्यंत एव। न
हि प्रस्तुते वंदेस्यार्थे लंबोदरपदं किंचिदुपकारं पुष्णाति। तेन पुनरुक्तदोषः पुं अनर्थ
तेऽपि न भवतीति सिद्धं। यत्तु वक्त्रा हर्षभयादिवशात् पदादि स्त्रिर्वा प्रयुज्यते। तत्र
दोषः। तेन विना हि कथं हर्षभयाद्यर्थप्रतीतिः स्यात्। तदुक्तं श्री आवश्यके।
यभाणत्तदोसेहं त्सुउवए सप्पुरुपयाणेसु। संतगुणकित्तणेसु नहुंति पुनरुत्तदोसा।
यथा। जयजयवर्बरजिष्णो विष्णोरवतार भूपजयसिंह। अरिकेशरहस्तल हस्त
१५ प्रति दुर्वारवीर भुवनेऽस्मिन्। १। अत्र शब्दो विना हर्षो न गम्यते। हस्तशब्दस्य तु
न पुनरुक्ताभासत्वमेव। भिन्नार्थत्वात्। भये यथा। अहिरहिः। एवं वीप्सानुवादादिष्वपि द्र
ष्टव्यं। ८। अथ श्रुतिकटु आह। निष्ठुराणि विदग्धैः भग्नानि कठोराणि अक्षराणि यत्र त
त् श्रुतिकटु इति पठितं। उदाहरणमाह। एक। ०। यथा शब्दो निदर्शनापेक्षाना
षि। इयं युवती स्रष्टा विधात्रा घटिता किं भूतेन एकाग्रं सावधानं मनो यस्य ए

कान्यमनाः तेन मन्येइति वितर्के। एवं विधार्येऽनुतरूपस्यान्यथानुपपत्तेरिति। अ
त्र स्त्रकारः इति श्रुतिकंठारं। ७। व्याहतार्थमाह। व्याहतार्थः। ०। तसदं व्याहतार्थं भव
ति। यत् अभीष्टार्थस्य वाधकं। अर्थांतरमन्यार्थं आश्रयति। एकस्मादर्थादन्यो
र्थः अर्थांतरं। इष्टार्थवाधकं च तदर्थांतरं आश्रयो यस्येति समासविधिः। उदा
हरणं यथा। रतस्त्वं भूतलस्य उपकृतिः उपकारस्तत्र तंरतः आसक्त इतीष्टो
र्थः। तस्य वाधकं भूतानां प्राणिनां लोपकरणे रतस्त्वमित्येवं विधमर्थांतरं आ
यति। भूतलोपकृतिरत इति। १२। अथालक्ष्यं लक्षयति॥ शाब। ०। यसदं श
ब्दशास्त्रेण व्याकरणेन विरुद्धं। तत् अलक्ष्यं कथ्यते। उदाहरति। मानिनं
यर्थेत्युदाहरणार्थं॥ मानवतीनां तरुणीनां मानस्याहंकारस्य दलयता
नोहारकः। इंदुः ध्वंसे जयति। चंद्रोदये मन्मथोन्मादेन पतिषु साहंकारा
पि सुव्रतया मानं मुंचंतीति। अत्र परा वेर्जेरितिसूत्रेणात्मनेपदप्राप्तिरतो विजे

यता। ति परस्मैपदं दुष्टं। विजयते रसेवसत्यं।१। स्वसंकेतप्रक्लृप्तार्थमाह। स्वसं।०।
नीयते इति। नेयं ग्राह्यं न तु गम्यं। येन च तदर्थान्तरं च नेयार्थान्तरस्य वाचकं पदं। स्व
संकेतप्रक्लृप्तार्थं भवतीत्यर्थः। उदाहरति। यथा रिभाति। अत्र वानरध्वजैरिति
कुंभीरस्मैः अर्जुनरक्षैरित्यर्थः। वानरध्वजशब्देन अर्जुननामा पांडवः कथ्यते।
स्यकपिध्वजत्वात्। ननु अर्जुननामसादृश्येन ककुभवृक्षाः। तेन वानरध्वजशब्देन
ककुभवृक्षा न कथ्यंते। ततः स्वसंकेतेनैव प्रवृत्यार्थं वानरध्वजपदं। यत्तु समस्त
कविसंकेतेन प्रवृत्यार्थं भवति न तत्र दोषः। यथा। रथांगशब्दस्य चक्रनाम्नि पक्षि
णि। द्विरेफशब्दो भ्रमरे। द्विकशब्दः काके।१२। अथाप्रसिद्धमाह। यस्य।०। यस्य पदस्य
प्रसिद्धिः कविरूढिर्नास्ति तदप्रसिद्धं विदुर्जानंति। धातूनामनेकार्थत्वात्कथयंति वा।
उदाहरणं यथा। हेम्नःपंकृतवकीर्त्तिः चतुःसंख्यान्पूर्वपश्चिमदक्षिणोत्तरान्समुद्रान्
हंति। गच्छति भ्राम्यतीति भावः। अत्र हनकुहिंसागत्योरिति धातुपाठे गत्यर्थः। पठि
तोपि हंतिधातुर्नेकविपरंपरायां प्रसिद्धः। प्रयोजनविशेषेतु गत्यर्थप्रयोगोप्यदुष्ट एव।।

पथविशेष: म्लेछादिषु। २३। असंमतमाह। शक्तो। न यत् समर्थं आख्यातुं अभिधेयं
वक्तुं। शक्तमपि समर्थमपि सर्वत्र महाकविग्रंथेषु न संमतं कवीनां। नाभिमतं त
दसंमतं कथ्यते॥ यत्तदो नित्यसंबंधात्। तच्छब्दस्यास्य यं गम्यगम्यमानत्वात्। अ
त्रोदाहरणमाह। रवे: सूर्यस्य अंशव: किरणास्तमेवांभोज: कर्दम: तं तमोंभोजं
ध्वांतरूपमंभोजं कर्दमं क्षालयंति प्रक्षालयंति सूर्यांशव:। अत्र अंभोजशब्द: अंभस:
जात: अंभोज इति व्युत्पत्त्या कर्दमं वाचयितुं समर्थोऽपि कमलादन्यत्र कवीनां
न संमत:। कमल एव तस्य रूढत्वात्। यथा प्रपूर्व: स्मृधातु: विस्मरणार्थे ए
प्रसिद्धो न तु प्रकृष्टस्मरणार्थे। तथा चोक्तं नैषधकाव्ये॥ नाक्षराणि पठता
किमपाठि प्रस्मृत: किमथवा पठितोऽपि। इ समर्थितचयसंज्ञाय दोलाखेलनं
तु चकार न कारः। तथा प्रपूर्व: स्थधातुर्गमनार्थे प्रसिद्धो न तु प्रकृष्टस्थानार्थे
यथा। सो नगरं प्रस्थित: गत इत्यर्थ:। तथा इत्थंभूतेर्विहृति: करणे न तु संमतान्विहृने

निष्ठुरं ३

यथा। सन्धिया विस्मयावहा॥ विस्मयकारी सर्थः॥ एवं संमतमेव पदं प्रयोज्यं काव्येनान्यत्॥
१४। अथ ग्राम्यमाह। यद्य॥ यत्पदं यत्र देशे अनुचितं वक्तुमयोग्यं भवति। हि निषि-
द्धं तत्पदं तत्र ग्राम्यं स्मृतं कविभिस्तत् अश्लीलं कथितमित्यर्थः। यथेत्युदाहरणे॥
हं पुष्पैः सुरानभ्यर्च्य। वल्यं ढौकयामी सेवं वक्तुं योग्यं भवति। अत्र तु अहं देवा
पुष्पैः छादयित्वा अग्रे धान्यं क्षिपामीति ग्राम्यो एलोकतुल्यं वचनं प्रोक्तं। ततः त
त्रांपदं ग्राम्यं ज्ञेयमिति। तथा व्रीडा जुगुप्सा अमंगलप्रतीतिकरा ये शब्दास्तेपि सभ्य
मनुचितत्वाद् ग्राम्या एव। व्रीडाहेतुर्यथा। साधनं सुमहत् यस्य इ सत्र साधनशब्द
दुश्चिन्हार्थोपि शंक्येत। जुगुप्सावाचको यथा॥ वायुः प्रसरति। वायुशब्दः पानपव
न शंकाकारी। अमंगलप्रतीतिकरो यथा। संस्थितोयं। संस्थितशब्दोत्र मृतता
र्थशंकां करोतीति। तथा। अतिपेशलमिति परिमितवर्णलघुतरमुदाहरतिषण्ढः।
परमार्थतः सहृदयं वहति पुनः कालकूटघटितमिव। अत्र पेशलशब्दो सभ्य
त्वाद्ग्राम्य एव। याम्यां यापि शिष्यादयस्तु कविह्रेत्रो समाप्त्वाद्ग्राम्यौ॥ नतु सर्व

भगवती भगिनी शिवलिंग प्रभृतयस्तु लोके विरुद्धत्वाद्दुष्टाः ॥ उक्तं च । लोक
वत्प्रतिपत्तव्या लौकिकार्थाः परीक्षकैः ॥ प्रतिलोकव्यवहारं सदृशो बालपंडितो
इति । केचित्तेषामप्यनर्थकादीनां पदोषतां वर्णयन्ति यस्य स्मरदासी तव वाहं सस्तव
दा । तं तमानयमनोक्तिमेनाम ध्येतस्सयं शुकः ॥१॥ वकारदाकारादयोऽनर्थका अ
लक्षणास्त्र । तथाप्यत्रानुकरणार्थं गात्रे तेषां न दोषः । युगपल्लस्तु ति निंद्योर्वाच्य
यो व्याहतोऽर्थमपि न दुष्टं । यथा । रतस्त्वमेव भूपाल भूतलोपकृतो सदा । अत एव
यशः स्वैरं तवाप्यर्थीभिरकीर्त्यते ॥१॥ स्वैरं स्वेच्छाचारिमंदं च । अपूर्वा जिह्मुताः अ
रपूर्वाश्च अकीर्त्यते इत्यर्थः ॥ प्रहेलिकायां स्वसंकेतप्रक्लृप्तार्थमपि न दुष्टं । य
अवलोर उण सामलवयणा रउधामदार उज्जो उ रवितणयम उलीक य
पस्सूलं कुरं गच्छि ॥१॥ अत्र रवितनयः कर्णः त छब्दवाच्यः ॥१५॥ संप्रत्य
वाक्यदोषान्क्रमेणाह । पदालेन ॥७॥ उक्ताः पददोषाः यस्मिन्वाक्ये सदोषपद
प्रयुज्यते तद्वाक्यमपि सदोषपदयोगात्सदोषमेवेत्याह । तद्दोषाः पदगतदोषाः

अनर्थकादिकाः। इति निश्चितं। तत्र वाक्ये संति। वाक्यस्य पदात्मकत्वात्। सदोषप
दैर्निष्पन्नं वाक्यमपि सदोषं। निर्दोषैः पदैर्वाक्यमपि निर्दोषं। यथा। राजेंद्र भव
कीर्त्तिश्चतुरा हंतिवारिधीन् नित्यं महंतीति सदोष क्रिययासमग्रं वाक्यं सदोषं ज
एतावताये पददोषास्ते वाक्येपि संभवंति। ते अपदस्थवाक्यदोषाये पदेन संग
तु वाक्ये संति तानधुना ब्रूमः।१६। खंडितं।०। एवंविधं वाक्यं दुष्टं सदोषं। छंदो
रीति भ्रष्टं। पतिभ्रष्टं। अथानुक्रमेण सर्वनाह। वाक्यांतरप्रवेशेन। यद्वाक्यं
तरन्यासेन विछिन्नं त्रुटितं तत्खंडितं। जिनस्वामी वो युष्मान् पातु इति वाक्यं यः भ
द्रस्तोति वाक्यांतरेण खंडितत्वात् खंडितं।१७। संबंधे ०। एकस्मिन्नेव वाक्ये संबं
धि पद दूरत्वे सति यस्य पदस्य यत्पदं संबंधि तत्तत्रैव योज्यं। तद्दूरत्वे सति व्यस्त
संबंधमुच्यते। यथा आर्हतामायपातुनि ज्ञातावः संपदं इत्यादौ तत्संबंधिपदानां
पद्दूरे स्थापनेन व्यस्तसंबंधं ज्ञेयं।१८। शब्दार्थौ।०। यत्र बंधे शब्दार्थौ तुलाधृता
विव न समितौ। यथा तुलाविधृते द्वे येद्वयोः पार्श्वयोः न समितौ। यत्र शब्दा बहवो

चौल्यः वाक्यविदस्तद्वाक्यमसमर्थमाहुः । उदाहरणमाह । मानसौकः ॥ मानसे
ओको गृहं यस्य स मानसौकाः पतत्रं हंसः स एव यानं यस्य स तथा सौ देवश्च समा
नसौकः पद्मयानो देवो ब्रह्मा तस्य आसनं कमलं तद्वत्साहश्यपि विशिष्टे लोच
ने यस्य । स जिनः वः युष्माकं तमो हरतु विपक्षारिप्रियो हिरालु हरतु तमोरिः स
यीः तस्य विपक्षो राहुः तस्य अरि विष्णुस्तस्य प्रिया लक्ष्मीः तां ददातु । अत्र
शब्दबाहुल्ये श्लोकत्वं । एव दोषः । अन्यच्च स्वरमलक्ष्मं । एवं न दोषः । शब्दबा
लेर्थबहुलता गुणाय भवतीति ॥ २१ ॥ अपक्र० । यत्र वाक्ये प्रसिद्धक्रमलंघन
पक्रममुच्यते । अथ तेज क्रमो यस्मात् तदपक्रममुच्यते । यथा होस्नानं त
वंदनं । ततो गुरु नमस्करणं । तदनु भोजनमित्यादि । मित्यादि क्रमोत्र सु
२२ । छंदःशास्त्र० । यद्वाक्यं छंदःशास्त्रविरुद्धं तत् छंदोभ्रष्टं कथ्यते । तद्य
सुदाहरणे । स जिनपतिर्जयतु विजयतां परब्रह्मणो महानिधानं । इसत्र

स जयति ॐ देवो भंगः॥ आद्याक्षरानगणपतनादनुष्टुपूलक्षणंनास्ति। यथाचोक्तं।
वक्त्रं नाद्यान्नसौ स्यातामिस्यादि। अधिकारस्तु तत्रवृत्तरत्नाकरछंदसिचिलो
नी पठ्यति॥ गारीति।०। यत्रवाक्यैरीतेर्वक्ष्यमाणाया अनिर्वाहो भवति तद्रीति
रूध्यते। जिनो जयति। अत्रसमासोनास्ति। वैदर्भीरीतिः॥ इंद्राद्यमरवंदित
चालीरीतिः॥ सस्तमासा॥२४॥ पादांत०। यद्वाक्यं पदांतविरस्यापदमध्ये विरति
यातपोभोक्तं यघीति भ्रष्टं रूध्यते। पदांते सर्वत्र विरतिः कार्या नतु पदमध्ये। य
विरती एकार्थे। नमस्तस्मै जगत्स्वामी स्यत्र वर्णपूर्णत्वात् पदांतयतिः कृता। ने
रक्षक्षरं चतुर्थपादे पतितं नैवं भवेत्। भवेच्चक्कापि संध्यादि विम्रो नैभावात्॥२५॥
सक्रि०। असती क्रिया यत्र वाक्ये तत्क्रियापदविहीनं असत्क्रियमनुच्यते। यथा। हं
सरस्वती नुष्यैरर्चयामि। श्रीरवंडधुस्तेणोधि लिंपामि स्तनैः स्तोमि रसाछि(?) क्रिया
या मभावात् असत्क्रियत्वं। तथा नविधानेसती मंगलार्थी क्रियायत्रेसन्वर्या

श्रपणाद्मंगलार्थक्रियाहीनत्वे कश्चिन्न दोषः। यथा। मा भुजंगास्तरंगिण्यो मार्गं दुः
क्रूरदंतिनः। भवंतं वत्स संप्राप्तं पंथानः संतु ते शिवाः।५। अत्र हे वत्स भुजंगा मा दु
ष्टुः तरंगिण्या नद्यो मा नेषुः। मा गंडा मादाष्टुः क्रूरदंतिनो दुष्टगजाः पथिन्वां मा भे
त्सुरि साध मंगलार्थक्रियाहीनत्वेपि न दोषो यदि शोभनास्त्वर्हि हे वत्स ते तव पंथानः शि
वाः संतु कल्याणा भवंतु इति मंगलार्था क्रियाप्रयुक्ता क्रिया गुप्तकेषु पुनरसत्क्रि
याप्यास्त्येव गुप्तायाः क्रियाः सद्भावात्। यथा। राजेंद्र करवालोयं कीर्ति
पर्यागनारतः। भुजंगत्यक्तमूर्तिस्ते द्विषल्लोहितं कुंकुमैरि सत्र भुजंग
या पदं नष्टप्रायं।२६। द्वित्रा। ७ उक्ता अष्टावपि वाक्यदोषाः। अथ वाक्यस्यार्थ
नाह। वाक्यार्थविदः पुरुषा वाक्येषु देशविरोधिनोऽर्थान्। तथा कालविरो
आगमविरोधिनः अवस्थाविरोधिनः द्रव्यविरोधिनः। आदिशब्दात् लोकवि
धिनोप्यर्थान्। विशिष्टं कारणं विनान रचयेयुः। सर्वेषामुदाहरणान्येव

न्नेवकाव्येप्रदृश्यंते ॥ २७ ॥ प्रवे ॥०॥ यथाप्रशामिनः क्षमापराः चैत्रस्यचैत्रमासस्यप्रवे
शेमार्तंडेसूर्येप्रचंडेसतिमरुसरसिमरुस्थलीसरोवरेजलश्रीउयातंपानीयश्रीउ
र्ध्वमागतं । मदनांधंबालद्विपकुलंकलभसमूहं असमशरपातैर्विषमबाणप्रहारे
ति । किंभूतेचैत्रप्रवेशे । स्फुटकुजराजिस्मितदिशि । स्फुटाः प्रकटाः कुटज
षां राजिः श्रेणी तया स्मिताः हसिता दिशो यत्र प्रवेशे । किंभूते । मार्तंडे । हिमव
समानं उष्मणो महो यस्य सः तस्मिन् । तथा वर्षाकाले कुटजा भवंति । नवसंत
तिकालविरुद्धं । मार्तंडे हिमशीतलता इति द्रव्यविरुद्धं । मरुसरसि जलश्रीउ
इति देशविरुद्धं । बालद्विपानां मदांधता इत्यवस्थाविरुद्धं । प्रशामिनो विध्यंती
सागमविरुद्धं । यत्र तु विशिष्टं कारणं तत्र न दोषः । यथा । लंकेश्वरनारीनयनाश्रु
वारिभिर्निरंतरनिर्मूलितपत्रवल्लिभिः । सरांसि सकज्जलकर्दमाविलान्यचै
रजायंत मरुस्थलीष्वपि ॥ १ ॥ इत्यादौ न दोषः । एवं सर्वत्र भावनीयं ॥ २८ ॥ इति ॥०॥

विबुधैः सदा कविहृदयसागरोत्थितं इह शंका व्यमास्वाद्यते । यथा सागरोत्थममृतं देवैरास्वाद्यते रसमुक्तिलेशः ॥ २४ ॥ इति वाग्भटालंकारे द्वितीयः परिच्छेदः ॥ २६ ॥ अदो० दोषरहितावपि शब्दार्थौ येर्गुणैर्विनाकृतौ विना न प्रशस्यैते इदानीं तान् गुणान् यथाक्रमं लिपथा भवति अभिव्यक्तिये स्पष्ट तन्निमित्तं वदामः ओदार्यं० कवित्वस्य औदार्यादियोदशावक्ष्यमाणा गुणा भवंति । नामानि दृष्टा नामपि सुगमानि । प्रत्येकं सोदाहरणान् अर्थानाह । तथाभिव्यक्तये इत्यत्र तात्पर्यतुर्य । तेन यद्यपि दोषाणामभावो गुणान् साधयति तेन यद्यपि कति ते गुणा नामानः किं स्वरूपाः इत्यभिव्यक्तिर्न स्यात् । अतः अभिव्यक्तिं वदाम । दा० । यदर्थचारुत्वप्रसाधकपदांतरैर्मिलितानां अर्थसम्पत्तोपादानपदैः संयोजितानां पदानां आदानं करणं तदौदार्यं स्मृतं । उदाहरणम् । गंधे । ० । श्रीनेमिनाथो ऽत्र करी उज्जयिंतो रैवतके चिरं तपांसि चकार राज्यमपास्य

कथं ॰तंराज्यं। गंधेभै र्गंधहस्तिभिर्विभ्रा। जितं भ्रशो भितं धामगेहं यस्मिन्तत्। लक्ष्म्या
लीलांबुजं लीलाकमलं पादद्मो वं विधं ॰ यस्मिन् राज्येपत त् लक्ष्मी लीलांबुज॰
अत्रे भकमल गिरिश्राव्दानां गंधलीलाक्री अपदे र्मिलितानां सतामर्थरम्यत्वोप्पाद॰
हार्यं। इभकमल गिरिश्राव्दानां केवलानां तादृशी नशोभायादृशी गंधलीलाक्रीअ॰
रैः संयोजितानां भवति। एतद्दोषपर्यनुच्यते।४। वस्यय।० समतां कांतिं च ए कम्ले॰
वाह। वंधस्य पद वैषम्यं अविषमता सु कुमार तासा समता मता। तस्यैव बंधस्य॰
नत्वं निर्मलता सा कांतिरुच्यते। उदाहरणमाह। कुच।० साकी दशी विघातेइ तिकेनाप॰
पिदृष्टः सन् उवाच। भोकथय अहंतां नेतवचेत सि कथं व्यंजयामि। कथं प्रकटी करो॰
मि। अनन्योपमे यां न अन्याभिरुपमीयते इत्यनन्योपमेया तां सर्वोत्तमरूपामित्यर्थः॥
असदृशा महिमानं सर्वोत्कृष्ट माहात्म्यं। यदंगा संगिनी हार वल्ली यस्याः अंगलग्ना
हार लता कुचकलशा विसारि स्फार लावण्यधारां अनुवदति अनुकरोति। कु
चकलशाभ्यां स्तनकुंभाभ्यां विसारिणी प्रसरणशील स्फारा उदारा या ला

वएयधारा नामनुकरोति। एवंविधरूपांतां कथं व्याख्यापयित्वा ते चेतसि प्रकटयामि
अत्रोत्कटपदाभावात् उर्जितपदाभावाच्च समसमबंधत्वात्समता कथिता। एष स
मता ... गुणो द्वितीयः।६। फलं ।१० कस्यापि धनिनो वर्णनमेतत्। असावनिर्दिष्ट
नामा कृतिः पुराजन्मनि पूर्वभवे कश्चित् कुत्रापि। नन्तुनिश्चितचरणो। वनभुविका
ननभूमौ श्रीफलदलैः बिल्वपत्रैः खंडेंदोर्हरस्य पादार्चनं चरणपूजनं अकृत चका
मतः। अथ श्लेषः यस्य राज्ञः चंद्रस्य उदये क्षोभमवाप्य सिंधुनाथः समुद्रो वे
लां मर्यादां जयाह। सीतकरैः किरणैः लोकानां समंतात् हर्षमुत्पादयतः। तै
रेव पदैः श्लेषोलंकारः।१२७। कुवल०। चित्रं योराजा चंद्रः निशांते प्रभाते
कांतिमत्तया कांतिमत्वेन रराज। किं कुर्वन् कुवलयोल्लासं रम्यां भाजं श्रियं

रम्यकमलशोभां हरन् । श्लेषमाह । यो राजा नृपः निशांते । तः पुरे कांतिमत्तया
रराज । कुवलयोल्लासं भूवलयोल्लासं कुर्वन् । रम्यां शोभनां भोजश्रियं भोजलक्ष्मी
हरन् गृण्हन् । एषभिन्नपदः श्लेषालंकारः ।१३०। असुहृत्समुच्चयालंकारमा
ह । ए०।० यत्रकविरेव अनेकेषां असुहृत्शनां असुत्तमानां अस्यपकृष्टानां अस्य
धमानां वा वस्तूनां एकत्र निबंधं गुंफनं ग्रंथनं योजनं मिसि(?)कार्थः तं समुच्चयं व
दंति ।१३१। अण०।० सर्वोत्तमं अणहिल्लपाटकं पुरं । तस्मिन् अवनीपतिः कर्णदेव
नृपसूनुः जयसिंहदेवः सोपि सर्वोत्तमो भूपालेषु । तस्य श्री कलशनामधे
वीदूत्राः(?) इहजगत्रिएतानि त्रीणि रत्नानि ।१३२। अत्यपकृष्टालंकारमाह ।
ग्रामे वासः इत्यादि सुगमं । भावनास्वयमेव विचारणीया । एष अत्यपकृष्टा
यालंकारः ।१३३। प्रशंसा०।० यत्राप्रस्तुतस्यापि वस्तुनः प्रशंसा क्रियते
धियस्तामप्रस्तुतप्रशंसामाहुः ।१३४। स्वैरं ।० को विदुः स्त्री चिंतार्त्तिः

चिंतयते॥ संतोषसारं दृष्ट्वा एवमुवाच। अत्र ते न दुःखिना भिक्षुः असंसाता
त् प्रारब्धात् कापि नास्ति। परं दुःखदग्धाए वं विचारयामास इति अप्रस्तुत
स्तोत्रेया। १२५। पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानां पाश्चात्यपाश्चात्यार्थविशेष
न त्सराणां अर्थानां या रचना उत्तरोत्तरं सा एकावलीमता कथिता। १२६।
देशाः समृद्धनगरप्रत्याद्युदाहरणं। १२७। प्राग्॰। यत्र प्रत्यक्षात् लिंगतः का
यवर्त्तिनो ज्ञानं भवति तदनुमानमुच्यते। यथा लिंगं लिंगी च अग्निः लिंगस्य
स्य दर्शनात् लिंगी अग्निः अनुमीयते। अनयारीसा सर्वत्र ज्ञातव्यं। एतदनुमा
विति। १२८। नूनं॰ नूनं विभो सुनिस्य अभिषेकांभसा न यस्तदा अभवत् अन
था एतासु नदीषु जनः स्नानेन न कथं शुध्यति। नदीस्नानेन न शुद्धिरित्यल्लिंगं॥
लिंगी च तदा विभोर भिषेकांभसा भवन्ति इति। एषः अनी तालंकारः। १२९॥
जंभ॰। जंभिभेदि इः तस्य ककुप् दिक्कुपर्व दिक्कुलस्यां प्राज्या तिस्ते जोय यथा
शुभ्रं श्वेतं विजृंभते। अहमेवं मन्ये। हे स रविरखलः संतापकारी निशाकर

उद्देश्ये नीसेतत्कथा। चिह्नैरहिण्यासस्त्वेषु उक्तं एष भविष्यानुमानालंकार:।।१०।।
मुख०। दोषाकरश्चंद्र अस्यानायिकाया: किंकरतां विभर्त्ति कर्मकारतांयाति। की
दृशो मुखप्रभावाधितकांति: नोचेत्कथ दिनैवं। अयंचंद्र: तल्लोचनश्रीहृतिसा
पराधानि। तस्या: लोचनश्रोभाहरणेनसापराधानि कमलानि किं क्षिणोति
संकोचयति। अन्योपि सेवको निजाधिपतेअपराधकारिणं शत्रोसत्वांनसह
तेइत्यर्थ:। एषवर्त्तमानानुमानालंकार:।।१५।। यत्रसा०। यत्रकश्चित्किंचि
त्साधारणं वस्तुएकत्र अन्यत्रतन्निवृत्त्यैप्रतिपाद्यते। यद्वस्तुएकत्रए
स्मिन्स्थाने भवति। अन्यत्रतन्निवृत्तिर्भवति। सापरिसंख्योच्यते
यत्रवा०। यत्रपुरे परंकेवलंवायु: पौरसौरभसंपदांचोर: अन्यच्चो
को नास्ति। यत्र युवान: कृतरोषात्कव धूजनात्बिभ्यु:। नान्यत्र
कस्यापिभीत्यर्थ:।।१६२।। प्रश्न०। यत्रप्रश्नेउत्तरं व्यक्तंगूढंवापि। अथ

उभयं व्यक्तगूढात्मकं एतत्स्य प्रोत्तरं ज्ञेयं। यत्र यथोक्तानां शब्दार्थानामलंकारा
णां उक्तानां एकत्र रूपादिभिः णानं ससंसर्गः ससंकरालंकारः। प्रश्नोत्तर
हरणमाह।१४४। अस्मिन्नु०। हे साधो अस्मिन्नपारसागरे निमज्जतां
समालंबनं किं इतिप्रश्ने यक्तमुत्तरं रागद्वेषपरिक्षयः। एष व्यक्तः प्र
त्तरालंकारः।१४५। कसंत०। हे कोविद वद। भर्तारां राज्ञां श्रियो नि संक्रम
असौ अतिशयः कोपि यत् उत्तमपि नज्ञायते। असौ खड्गैः इत्युत्त
एष गूढ प्रश्नोत्तरालंकारः।१४६। किमेष्टं। ए एतं श्लाघ्यं किं दानवारि
द्विजलं। पक्षिणां का आख्याति:आख्या॥वि:पक्षी। पत्राः कुतो भवंति। अ
जितः संग्रामात्। गरुडो निःसंकी इत्यभवति। दानवारि विराजितः दानवा
रि र्वासुदेवः तेन विराजितः शोभितः। अत्र प्राग्गूढत्वात् प्रश्नात् सकृदुत्ता
नु गूढ व्यक्तप्रश्नोत्तरालंकारः।१४७। बंसं०। इदानीं ग्रंथकार इदं अलं

कारकर्तृत्वात्स्वापनाय वाग्भटाभिधस्य महाकवेः महामात्यस्य तन्नामगाथया ए
कयाभिर्दिशति। कस्य कस्यापि अत्र गाथायाम् निर्दिष्टस्य श्रीवाग्भटः श्रीबाहड
इति तनय आसीत्। कीदृशः सरापिबुधः विशेषालंकारोऽत्र समवगंतव्यः। शुक्ते
क्षेत्ते। ब्रह्मांडशुक्तिसंपुटमौक्तिकमणेः प्रभासमूह इव। तथाद्वारश्लोकेषु येऽलं
काराः प्रधानानामानः कथिताः ते सर्वे व्याख्याताः अन्येषु ग्रंथेषु अन्ये बहवोऽलं
काराः श्रूयंते। अत्र नोकार स्यात्। १४८। अथ०। अन्यासामलंक्रियाणां अनि
धेऽभणनेनिबंधनं कारणं अचमत्कारिता स्यात् उक्ते अन्योन्येषाम ध्वनेकी
दृक् चमत्कारः च मत्कारं विना कथनं प्रयास एव स्यात् न फलं किमपि। ...
धाउक्रांत भावि एव अक्रुक्राउ क्रांतरं भवंती स्पष्टाः। १४९। इति। ०। अथ
रमौहा। असमस्तपदैः दर्भी रीतिः। १५०। इव। ०। अत्र द्वे एव री
तः गौडी सा वैदर्भी चेति। यतस्त्वे संसारे सांतरे अंतरसहिते। ए
ध कुल क्षेपन दर्शयति। एका गौडी या बहुसमासा स्यात्। द्वितीया वै

असमस्तपदा अल्पसमासो भवेत्।१५१। दर्पो०। अयं त्रिश्राप गाया: त्रिश्रानघा: व
कल्लोल लोलाहलोविभ्रमक्रमेणाक्रामति। कीदृशः।स्पालाग्टितलुंगपर्वतग्र
ग्राव श्रपातस्य आहत्या आहननेन क्रूरं यथा भवति। आक्रंदंति यानि लुंठ
कुलानि तेषां ऋंकार शब्दैः घोरी कृतः। कीदृश्याः नद्याः बर्बरबध्यमानपय
बर्बरो राक्षसः कोपि अन्यो वा कोपि महान्तेन बध्यमानं पयो यस्याः। एषा बकुस
सा गौडीयारीतिः।१५२। विप्रा०। यत्र यस्मात् कारणात् द्विजेश्वरो विप्रः चंद्रो वा
धुपैः मधुपैर्भ्रमरैर्वा चुंब्यमानां कैरविणीं कुमुदिनीं करार्ग्रैः श्लिष्यति श्लेषा
कारैः। एषा प्रीती यावैदर्भीरीतिः।१५३। अर्थेन०। उपसंहारमाह।। इतिनामन
सुयेनार्थेन कवितं अतिचमत्करोति भक्तिचमत्कारमुत्पादयति। हंत इति वि
चारे। स एवार्थः। तस्मिन् कविले अनयैव पूर्वोक्तया रीत्या अलंक्रियते न
अलंकारेन भूषितं विचार्यतां। समाधारी लसः। स्फुटती तिरसोपतमितिर
सानात्।१५४। इति श्रीवाग्भटालंकारे चतुर्थ परिच्छेदं वृत्तिः ।। ४ ।। ।। छ ।।

अथ रसान् व्याचिख्यासुराह। साधु०। यथा पेनोन्यं शालिदालिप्रभृति साधुपा
के पिच्छेका स्पकारेण निष्पादने कृते पि निर्लवणं सत् अनास्वाद्यं अस्वादु स्यात्
तथैव काव्यं कुशलकविना कृतमपि शृंगारादिरससहितं अनास्वाद्यं। चतुर
चेतांसि न चमत्करोतीत्यर्थः। इति हेतोः कवयः वाग्भटाग्रेसर एवं वदंति॥
यं रसान् इह शास्त्रे ब्रूमः वदामः। त्रैलोक्यव्यापिरसविस्तरं शास्त्रप्रांत
मात्रे कथमवतारयिष्यतीत्याशंकयामतिमतामवज्ञाभादिया त्मनो
रससमाससामर्थ्यज्ञापनाय वयमिति बहुवचनं १। अनु०। व्याख्या॥
स्थं तिष्ठतीति स्थायी भावयति व्याप्नोति चित्तं विभावादिभिः प्रकटीकृ
रसतां प्रापितः सन्निति भावः। स च प्राणि प्राणि नवधा स्यात्। त
रतिः १ उत्साहः २ शोकः ३ हास्यं ४ विस्मयः ५ भयं ६ द्वेषः ७ जु
शामः ८ इति। यतः सर्वो जीवः सुखास्वादकारिरंसतो। १। रचहिताय

हते २ स्वमहत्वक्षतिशंकया शोचते ३ हसति ४ स्वपरव्यसवैचित्र्यदर्शना

द्विस्मयते ५ बिभेति ६ परस्मैकुप्यति ७ परं जुगुप्सते ८ वैराग्येणाकिंचि

त्पक्तुकामः सन् प्रशमं भजते। ९। न ह्येषि कश्चित्तद्व्यापारैः शून्यः किं

तु कश्चित्तदनुरक्तावस्थायां अर्वाक् केवलं कस्यचित्कश्चिदधिकः कश्चि

त्कस्यचिदुचितगोचरसंबंधः कस्यचिदनुचितेपि वस्तुनि। कस्यचित्स

कः कस्यचिदन्यथापि। न द्विशेषैरेव तममध्यमाधमभावाः प्राणिनां स

विशेषेण भावयंतीति विभावाः ललनोद्यानादयः। अनुकूलं भावयं

भावमनुभवंति निष्पादयंती अनुभावाः कटाक्षभुजाक्षेपादयस्त उभयेप्युपमेयाः। सत्वे

शरीरे भवंतीति सात्विकाः ते चाष्टौ। यथा। स्तंभः १ स्वेदः २ पुलकः ३ स्वर

भेदः ४, कंपः ५ वैवर्ण्यं ६ अश्रु ७ मूर्छा ८ इति। ● । धृतिः संतोषः १

स्मृतिः स्मरणं २ मतिरर्थनिर्णयः ३ व्रीडा मनःसंकोचः ४ जडता र्थाप्र

तिपत्तिः ५

रागतटा लंकार:

विषादश्चित्तपीडा ६ मदः प्रीतिसंमोहसंभेदः ७ व्याधिर्मनस्तापः ८ निद्रा
नयनसंमीलनं ९ सुप्तं निद्रागाढावस्था १० औत्सुक्यं विलंबाक्षमत्वं ११ अ
वहित्थमाकारगोपनं १२ शंका अनिष्टविचारणा १३ चापल्यं चेतोऽनवस्था १४
आलस्यं कार्येष्वनादरः १५ हर्षश्चित्तप्रसन्नता १६ गर्वः परावज्ञा १७ उग्रता
चंडता १८ प्रबोधो विनिद्रता १९ ग्लानिः बलापचयः २० दैन्यं कार्पण्यं २१
मः खेदः २२ उन्मादो मनोविप्लवः २३ मोहो मूढता २४ चिंताध्यानं २५ अम
उद्वेगः प्रतिकर्तुमिच्छा २६ त्रासश्चित्तचमत्कृतिः २७ अपस्मार आवेशः २८ नि
स्वावज्ञा २९ आवेगः संभ्रमः ३० वितर्कः संभावना ३१ असूया अक्षमा
रणं म्रियमाणता ३२ एते त्रयस्त्रिंशदेव नत्वधिकाः। ते नान्ये अत्रैवांत
र्भावात् हि श्रोद्वेगनिर्वेदक्षुत्तृष्णादिं ग्लानौ अमी व्यभिचारिणः। कथं
भवंति कदाचिन्न। जाता अपि स्वहेतुलक्ष्यैर्दीप्यंते। ज्ञाततत्त्वस्य न भवंति। त

मणिमंत्रौषधियुक्तस्य कदाचित् ग्लान्यालस्य श्रमप्रमुखाजन्म मध्ये
न भवंत्येव। रसादयस्तु तत्तत्कार्यतया प्रकल्पिताः अपि संस्कारजा
तां नसृजंति। एकवस्तुविषये तेषामुच्छेदेपि वस्त्वंतरविषये अनुच्छेदात्।
तेस्थायिनः। तथा ग्लानोयमिति उक्ते कुत इति हेतुप्रश्नः। तेन ग्लान्यादे
व्यभिचारित्वं। रामउत्साहशक्तिमानिति उक्ते कुत इति हेतुप्रश्नोनस्या
तउत्साहादीनां स्थायित्वं। तथा च सति काव्यनाट्य भाव शास्त्रप्रसिद्धैः
भावैः कारणैरनुभावैः कार्यैः व्यभिचारिभिः सहचारिभिः प्रकर्षप्राक
र्षमारोप्यमाणो नीयमानः। रत्यादिस्थायिन उपादानकारणानि। यथा
पटस्य तंतवः। न च समवायिकारणं द्रव्यमेव स्यात्। रसादयस्तु गुणा इ
तिवाच्यं। तेषां जीवद्रव्येभ्यो ऽपृथक् भूतत्वेन द्रव्यत्वात्। भंगोरेका
न्यं वस्तु प्रतियोगि। यथा पुरुषस्य स्त्री स्त्रियाः पुरुषः वीररसस्य पक्षे

विंपक्षगत धर्मयुद्धदानत्रयैः क्रमेण त्रो ध्यं। हास्येपि कृतवेषगत्यनुकरणा
दि। अद्भुतेऽपूर्ववस्तु। भयानके पिशाचादि। रौद्रे विक्षेले। बीभत्से व्रणपूया
दि। शान्ते सर्वसंसारनादि इति शान्तियोगिनः। एतेषां दश्यास्मन्तिरसमवायि
कारणं। यथा पटस्य तंतुसंयोगः। विभावा निमित्तकारणानि। यथा पटस्य
तुरीवेमादि। अनुभावाः निष्पन्नकार्याणि। यथा निष्पन्नस्य पटस्य
तत्राणगुह्यावरणादि। सात्विका व्यभिचारिणः सहजाः। यथा। पट
कारादयः २ स्थायिनां नवप्रकारास्तेनैतेरसा अपि नवभवंति। अत
हा श्टंगार० व्याख्या० उत्तममध्यमाधमप्रकृतीनां सर्वेषामपि
प्रथमं श्टंगारस्य न्यासः। ततश्चोत्तमप्रकृतौ भूयस्त्वादीरस्य
तः शेषाणां क्रमेण सर्वरसोत्तंसभूतस्य शान्तस्य तु अन्ते प्रतिष्ठा

णाम ष्टानामनादरे। ऐहिकआमुष्मिकोदयासत्तोन कस्यचिदेवात् स्तातप
रमार्थस्यपुंसः संभवात्। एवं चैतेबुधैर्नैवनलब्धिकान्यूनोवानिश्चि
निर्णीताः। ३। एतल्लक्षणमाह। जायेत्यादि व्याख्या। योजापत्योर्वक्ष्यमाण
योर्नायकानायकयोर्मिथः मिथः परस्परं रतेः प्रेमविशेषस्याव
पुनः पुनरभ्यसनमेतदित्यर्थः। सशृंगार उच्यते। विद्वद्भिरितिगम्
एषशृंगारोद्विविधो द्विभेदो मतः। इतीति किं संयोगः विप्रलंभश्च। संयु
तेजायापती अस्मिन्निति संयोगः। विशेषेण लभ्येते वं च्येते जायापतीप्र
फलेनास्मिन्निति विप्रलंभः। ४। तौ कथं स्यातामित्याह। तौतुत्यादि व्याख्य
तौ संयोगविप्रलंभौ तयोर्जायापत्योः युक्तवियुक्तयोर्मिलितयोर्विरहित
योर्भवतः सतौ वाच्यौ वक्तव्यौ पुनरेष प्रागुक्तद्विविधोपि द्विधा द्विप्रकारः प्र
छन्नप्रकाशाभ्यां। कोर्थः संयोगशृंगारः प्रच्छन्नः १ प्रकाशश्च २ भवति।

तथा विप्रलंभोपि प्रछन्नः प्रकाशश्च। प्रकाशः प्रकटः। एषु चतुर्ष्वपि शृंगा
रभेदेषु अन्योन्यस्य हार्दिका रतिः स्थायी। मिथः स्त्रीपुरुषौ आलंब
नरूपौ विभावौ। यथा। कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते क
ठिनहृदयस्त्यक्त्वा शय्यां बलाद्गत एव सः। इति सरभसं ध्वस्तप्रेम्णि व्य
पगतघृणे स्पृहां पुनरपि हतव्रीडं चेतः करोति करोमि किं। १। अत्र पुनरपी
शब्देन सुभगस्यालंबनविभावता व्यज्यते। तदुपयोगिपवनामेरं
डाकोदयास्तजलक्रीडादय उद्दीपकरूपश्च विभावाः। यथा। का
तीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः कर्णाटीचीनपीनस्त
सं नहशां दोलनस्पंदमंदः लोलल्लाटी लनालालकतिलकल
स्यलीलाविलोलः कष्टं भोदाक्षिणात्यः प्रसरति पवनः पांथकांताव

प्रच्छन्नकामभेदेन

अत्र पांथकांता रतांतःस्वेनेन पवनस्योद्दीपकविभावनाप्रतीयते। संभोगे
स्वेदाश्रुरोमांचकंपश्वासितकेशाबंधांशुकसंयमनभूषामाल्यादि
ग्निवेशानादुप्रभृतयोनुभावाः। यथा। दीर्घावंदनमालिका विरचिता
वनेंदीवरैः पुष्पाणांप्रकरः स्मितेन रचितो नोकुंदजात्यादिभिः। दत्तः स्वे
चापयोधरभरेणार्घो न कुंभांभसा स्वैरेवावयवैः प्रयस्य विहितस्तन्व्या
मंगलं॥३॥ अत्र स्वेदांभसार्घदानेन तन्व्याः स्वेदादयोनुभावा व्यज्यंते
सुखमयाहर्षादयो व्यभिचारिणः। यथा। तद्वक्त्राभिमुखंविनमितं दृष्टिः
तापादयोस्तस्यालापकुतूहलाकुलतया श्रोत्रे निबद्धमया। पाणिभ्यांच पुर
स्वत्तुः सपुलकः स्वेदद्गमोगंडयोः सख्यः किं करवाणियांतिशतधा य
कंचुके संधयः॥४॥ अत्र संधयः शतधायांतीत्येनना ... धिक्यं॥ विप्रलं
भे ह्रयसंतापसुप्तादीनवचनजागरविलापः लेखलिखनवाचनवार्ताप्रश्न

३५

मरणोद्यम संदेशाद्योनुभावाः। जुगुप्सालस्यवर्जिताः तदुक्तौ बीभत्सादि र
सप्रतीतिः स्यात्। उदाहरणानि यथा। श्रीखंड कर्पूरमृणालमालाज्ञीतोपचा
रैः सखिभिर्ममभिः। दौहोन स्लामरिवन्तीतेमे तं स्वे रिणं वैरिणामंतरेण १
अत्र दाहः संतापरूपः स्फुटः। तथा। मुंडेसंति सल्लक्ष्मणाः कुत्रालिनः मृ
रामपादाः स्वयं संतिस्वामि भिमाविधेहि विधुरं चेतो नया चिंतया। एन
व्याहरेद्विमे खिलसुत नामांतरेणाधुना रामस्त्वं हि हरेहणकं कणपदं प
पिता स्येचिरात्। २। अत्र ज्वरातारे वालावांकुरस्वेरेणुशावलो नस्येत
भूषः संपूर्णानवलोयभारगुरवो मुंचंतु नादं घनाः मग्नाकां। त
दुःखजलधौ मां वीक्ष्य दीनाननां विद्युल्लस्फुरसि त्वमप्यकरुणा स्त्री
नेपिहि। ३। अत्र दीनवचनतेति। एवमन्यान्यपि ज्ञेयानि। दुःखप्र
कोत्सुक्यमदग्लानिनिद्रानिर्वेदमरणादयो व्यभिचारिणः। यथा ५

से हिते कापदा निसा निसा धातूपसर्गयोः। निसा समासे वाक्ये तु सा विवक्षाम पेक्षते। १

तोरचितारुयौरुयौएकतारचिताचिता। अघकांतः कृतांतावादुःखस्यांतंकरिष्यति। १। अत्रकृतांतरितिपदेनानिष्टोत्प्रेक्षारूपाशंका॥ तथा। वर्षतिपरंनमेघः ... दाविनागाक्षिविप्रयोगेते। प्रहरतिनपंचबाणः केवलमबलेनिमेषोपि ... स्पष्टं स्फुटमेव। यत्र विप्रलंभेपाशबंधादिजमरणंदृश्यते। यथा। भ... दितंव्यर्था ...परलं प्रियगम्यतांलतुरपिनतेदोषो ...स्माकं वि...धस्तुपर... खः। तवयदितथारूढं प्रेमप्रपन्नमिमादशांप्रकृतितरलेकानः पीडागते... जीविते। ३। गृहेहतजीवितेद्ब्रसादिपाशबंधाद्युपायैर्मरणंसूचितं। तदप्यचि... कालसमाप्तिमयमितिनशोकस्यावकाशः। एवंचतुः प्रकाराशृंगारस्यप्र... त्तिः। तत्रहेकापिपरस्परालोकनाधरपानचुंबनाद्यैनंतभेदः परमेकएवग... म्यते॥ यथा। अलसचलितैः प्रेमार्द्रैर्मुहुर्मुकुलीकृतैः क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः। हृदयनिहितंभावाकूतंवमद्भिरिवेक्षणैः

कथयसुकृती कोयं मुग्धे त्वयाद्यविलोकितः ॥१॥ तथा ॥ अधरेऽद्भुतमस्ति
योषितां हृदि हालाहलमेव केवलं ॥ अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव
ताड्यते ॥२॥ इत्यादीन्यधरपानाद्युदाहरणानि ज्ञेयानि ॥ केवल
गुणमय उत्तमः ॥ स्वल्पदोषो बहुलगुणो मध्यमः ॥ केवलदोषवानधमः ॥ ते
षु प्रच्छन्नसंयोगे नायकैर्नाधिकार इति लक्षणमाह ॥ रूपसौ० व्याख्या ॥
अत्र प्रच्छन्नश्रृंगारविषये रूपसौभाग्याभ्यां परिपूर्णः ॥ कुलीनः उत्तमकु
लोत्पन्नः ॥ कुशलः शास्त्रोक्तस्त्रीहावभावज्ञाता ॥ युवा मध्यवयाः ॥ अनु
मात्सर्यादिरहितः ॥ सूनृतगीः सत्यवाक् ॥ सद्गुणः संतो विद्यमाना गुण
स्तथा ॥ ते चोच्यंते ॥ यथा ॥ दाक्ष्यशौर्योत्साहनीचजुगुप्सोत्तमस्पर्द्धा
का शोभा ॥ यतः शरीराकाराद्यावस्यादि प्रतीयते ॥१॥ धीरं गितसास्मि…

श्च विलासः २ मृदुशृंगारचेष्टा ललितं ३ महत्स्वपि मुद्भ्यामादौ क्षोभहेतौ
सत्यं व्याकुलत्वं माधुर्यं ४ विघ्नसत्स्वपि उद्यमादपरिभ्रंशः स्थैर्यं ५ हर्षादि निर्वि
कारानुपलंभ गांभीर्यं ६ यस्मात्क्रोधादीनां बाह्यविकाराः ६ ष्ट विका नं
स्वरागादयो नोपलभ्यंते । ॥ परेष्वपि परित्राणदानसंभाषणादि
औदार्यं ७ पराधिक्षेपाद्यसहनं तेजः । पराधिक्षेपोः न तु गुरोर्मित्रादेर्वा ८ एवं
धीनेता नायकः ख्यातः कथितः १ कलासक्तः सुखी शृंगारी मृदुर्निश्चिंत
श्चयः स धीरललितो जोरादिः २ विनयोपशमवान्यः स धीरशांतो माधव
नवत्सादिः ३ । सच तुर्यो । यथा । गूढगर्वः स्थिरो धीरः क्षमावानविकत्थ
नः ॥ महासत्त्वो दृढव्रतश्च यः स्यात्स धीरोदात्तः । यथा रामादिः ॥ १ ॥ अहंकारमत्स
रीमायी विकत्थनश्छलवान्यः स धीरोद्धतो जामदग्न्यादिः ४ उक्तं च । देवा धी
रोद्धता ज्ञेयाः स्युर्धीरललितान्नृपाः । सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्ति
तौ । धीरप्रशांता विज्ञेया ब्राह्मणा वणिजस्तथा । इति चत्वार एवैते नायकाः

समुदाहृताः। इति चतुर्विधोप्येतेभ्यो न तिक्रमादेकएवावसेयः ६ अथास्य भेदाना
हा अयं० अयमुक्तानायको विबुधैरिति चतुर्द्धा चतुःप्रकार उक्तो। ८ वोचि। इतीति
किं। अनुकूलः १ दक्षिणः २ शठः ३ धृष्टश्चेति ४ अस्य नायिका चतुर्विधा स्यात्।
तल्लक्षणान्यग्रे कथयिष्यंते ७ नायकभेदानां लक्षणान्याह। नीली० प्रियं० नील्या
गुल्याद्रवरागो यस्य स तथा स्थिरप्रेमेत्यर्थः। अन्यस्यां रमण्यामनासक्तश्चये
भवति सोनुकूल उच्यते। यथा। अतिविपुलं कुचयुगलं रहसि करैरामृशन्मु
लक्ष्म्याः। तदपहृतं निजहृदयं जयति हरिर्मृगयमाणइव। अत्र हरेर्मुकु
दीनेनानुकूलत्वमन्यरमण्यनासक्तिश्च व्यज्यते। यश्चान्यचित्तोप्यन्य
रक्तमना अपि स्वस्त्रियामविकृतसप्रेमा सउभयोरपि दाक्षिण्ययुक्तो द
णः कथ्यते। यथा। दृष्ट्वैकासनसंगतां प्रियतमां पश्चादुपेत्यादरादेकस्या
मीन्यविहितक्रीडानुबंधच्छलः। तिर्यग्वक्रितकंधरः सपुलकः प्रेमोल्लस

सा मंतर्हासचलत्कपोलफलकां धूर्त्तोपरां चुंबति। अत्रैकासनसंस्थितयोर्नायिकयो
कस्या नयननिमीलनेनापरायाश्चुंबनेन दाक्षिण्यमकारि ॥२॥ यस्तु स्या अप्रि
तनायिकाया अप्रियं कुर्वन्प्रियं वक्ति निजापराधगोपनाय स शठ उच्यते। यथा
कोमललोलबाहुलतिकापाशेन बध्वा दृढं नीलावासनिकेतनं दयितया सायं सखी
पुरः ॥ भूयो नैवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं धन्यो हन्यत एव निह्नु
परः प्रेयान्हसत्या दृशा ॥३॥ अत्रानिनुतिपरत्वेन शठत्वं स्फुटं। यः प्रत्यक्षाप
धोपि नायिकयापमानितोवगणितः सन्न विशीले व्रीडावान्स धृष्टः स्याद्यथा
चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे निभृतकितवाचारेत्युक्ते रुषा परुष
रुते। व्रजति रमणे निःश्वस्योच्चैः स्तनार्पितहस्तया नयनसलिलच्छन्ना दृष्टिः स
खीषु निपातिता ॥४॥ अत्र सापराधत्वाच्चरणयोः पतन्प्रतिषिद्धो धृष्टत्वाद्व्रजति ॥४॥
शास्त्रांतरे एताश्चतस्रोप्यवस्था एकस्य नायकस्य। यथा। सा ते भवतु सुप्री
ता यस्या देव्याः स्तनद्वये। अन्योन्यं कलहायंते चत्वारो हरिबाहवः ॥१॥ अत्र च
तुर्भुजानां कलहे नानुकूलत्वं प्रतीयते। रुक्मिणीभामयोः प्रेमणाप्यथवा श्वे

द्वयस्थयोः कुरुते युगपत्पाणिद्वयेसौ स्वयं चतुर्भुजः ।२। अत्र दाक्षिण्यं स्फुटं २
विप्रलंभयितुं भामां लक्ष्म्यानुत्कंठितो हरिः । ध्यान्यायें प्रियेपि किंचिदाश्चर्य
मितिजल्पति ।३। अत्र भामाविषये शाठ्यं प्रकटं ३ प्रसादनाय पाणिभ्यां पत
न्पिपदद्वये । दोषाभ्यां सरूपो लक्ष्म्यावक्षः कांक्षे चतुर्भुजः ।४ दोषाभ्यां वक्ष
कांक्षणं धाष्टर्यं । इति ।४।५।६।७।८।९। प्रोऽन्नायिका याश्चत्वारो भेदाउ
स्तेचामी । अनू० व्याख्या । अनूढा१ कन्या स्वकीया२ परकीया३ पण्यांगना
इति च तस्त्रो । भेदा भवंति । तासु चैव भूपो धर्मकामार्थिनः स्वकीयाम्
यथा रामस्य सीता । अन्यास्तिस्त्रः केवल कामिनः केवल सुरतार्थिन
था । माधवानलादीनां कामंदकलाद्याः ।१०। प्रथमाल्लक्षणमाह । अ
अनुरक्तेन प्रणयप्रेरितेन नायकेनानुरक्तायास्वयं देव
स्वीकृता भवेत् । भोक्तुमिति गम्यते । सौव्यिका अनूढा कथ्यते । य

२ना

दुष्यंतस्यराज्ञः शकुंतला ऋषिपुत्री। तेन हि विपिनगतेन सा विजने निलिताप्र
पात्रमकारि। ११। इति यौवनलक्षणमाह। स्वकीया०। यौवनगुरुसाहित्येनोत्तमप्रव...निं
केन स्वीकृता पाणौ गृहीता सा स्वीया नायिका स्याद्। शीर्षस्पष्टं। एषा च वय...
र्यां मुग्धा मध्या प्रौढा चेति त्रिधा। तत्र प्रथमायाः क्रोधादिचेष्टानां मुग्ध...
पदालग्ने पत्यौ नियम्य तमुरवं जातविनया हृदाश्लेषं वांछ सपहरति गात्राणि
न शक्नोति सा स्मितं तु स्मितमुखसखी दत्तनयनाप्यसौ साक्षाद्दोषः प्रथमवय
घ्य मधुरः ॥१। यथा। स्वपिति कुणति वेल्लति विचलति निमिषति विलोकयति तिर्य
तर्निंद्दति चुंबितुमिच्छति नवपरियावधूः शयने।२। अत्र मौग्ध्यं ॥ मध्यात्रिधा
राऽधीराधीराधीराच॥ तत्र मध्याधीरायाः क्रोधे उत्सासेव क्रोक्ती स्यातां। यथा
गुल्न्याकः कपाटं प्रहरति कुटिले माधवः किं वसंतो नो चक्री किं कुलालो न हि धरणि
धरः किं द्विजिह्वः फणींद्रः। नाहं घोराहिमर्द्दी किमथ खगपतिर्नो हरिः किं कपीन्द्र
इत्थं राधानिरस्तः प्रतिवचनजडः पातु वश्चक्रपाणिः।१। मध्याऽधीरायावाक्यपरु

संध्यां यत्प्रणिपत्य लोकपुरतो बद्धांजलिं याचसे धत्से यच्च नदीं विलज्ज शिरसा तच्चा
मसोढं मया। श्रीर्जातामृतमंथने यदि हरिं कस्माद्विषं भक्षितं मा स्त्रीलंपट मां स्पृ
शेत्यहितो गौर्या हरः पातु वः।४। अत्र स्त्रीलंपटेति गौर्या जल्पितं ध्येयाबोधि। मध्य
धीरा।५। धीराधीरायाः सबाष्पं तं स्यात्। यथा। सा पत्युः प्रथमेऽपराधसमये स
ख्युपदेशं विना नो जानाति सविभ्रमांगवलनं वक्रोक्तिसंसूचनं। स्वच्छैः
कपोलमूलगलितैः पर्यस्तनेत्रोत्पला रामा रोदिति केवलं प्रतिलु
ठल्लोलालकैरश्रुभिः।३। एवं प्रौढापि त्रेधा। तत्र प्रौढाधीरा उपचारावहि
त्था। यथा। विरहविषमः कामो वामस्तनुं कुरुते तनुं दिवसगणनादक्ष
पेतघृणो यमः। त्वमपि वशगो मानव्याधेर्विचिंतय नाथ हे किसल
दे कथं प्रमदाजनः।१। अत्र तस्या बहिरागद्धृष्येन न जातक्रोधायाः अप
धीरत्वेन क्रोधसंगोपनाय धैर्याद्युपचारः।२। प्रौढाधीराधीराया
तंथांसंतर्जना ताडनौ स्थले ॥१

तथासंतर्जनाघातोस्पष्टो ॥ १

स्यौदासीन्ये। यथा। मामायाते विलुठ निरमस्वामिनो हि स्वतंत्राः। किं विकालं बु
पि गतास्तेन कस्ते पराधः। आगस्कारिण्यहमपि मया जीवितं यद्वियोगे भा
राः स्त्रियइति ततो वामयैवाहमेयः। ३। अत्र प्रौढाया धीरतयामोपादानं
स्वामिनः स्वतंत्रा इति च औदासीन्यं अधीरतया आगस्कारिण्यहमित्य
एताः सर्वा अपि ज्येष्ठाः कनिष्ठाश्च भवंति। तत्र पूर्वं परिणीता ज्येष्ठा। पश्चात्परिणी
ष्ठा। इति द्वादश। मुग्धयासह त्रयोदशधापिनायिका स्वकीयात्वेनैव गण्यते।
स्याविंशतिरलंकाराः २० ते यथा। वाग्वेषचेष्टितैः प्रियस्यानुकृतिर्लीला १ स्था
स्थानादिविशेषो विलासः। २। सौभाग्यगर्वादल्पालंकारविन्यासः शोभा। विच्छि
गर्वादभीष्टेप्यवज्ञा विब्बोकः ४ स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाष
मतं किलकिंचितं ५ प्रियकथादौ तद्भावभावितत्वं मोट्टायितं ६ अधराद्ग्रह
दुःखेपि हर्षः कुट्टमितं ७ न्यस्तेणांगविन्यासो ललितं ८ प्रियकृतव्यलीकादे र
वसरेप्यजल्पनं विहृतं ९ वागंगभूषणानां व्यत्ययो विभ्रमः १० इत्येते दशसहजा॥

कामकलादाबसी। ध्वस्तत्वं प्रागल्भ्यं। १। सत्यपि पत्युरपराधे स्नेह औदार्यं २ क्रोधे
पिवच नाघपारुष्यं माधुर्यं ३ रूपे लावण्यैः पुंभो गादभिवर्द्धिते ः। मंदाम ध्याती श्रा
अंगच्छाया क्रमेण शोभा ४ कांतिः ५ दीप्ति ६ अचापलाविकत्थनेन्त्व धैर्यं ७ एते स
त अयलजाः। हावभाव २ हेला ३ अल्प बहुभूयो विकारात्मकास्त्रयः शरीरजाः।
वमेते विंशतिरप्युत्तमनायिकायाएवस्युः अम्यास्तु रूपलावण्यवतीष्वप्यभावात्।
बाल्ये ऽनुद्भिन्नाः। यौवने उद्भिन्नाः दृश्यंते। वार्द्धके तिरोभूताः। पुरुषस्याप्य
वंतिन थापि योषितामेत एव अलंकाराइति तदृत्त्वेन वर्ण्यंते। पुंसस्तूत्त्वा
रमोलंकार इति १३ परस्त्री लक्षणमाह। परकी०। व्याख्या। परस्त्र्यपि
पूर्वोक्ता परिणीत कन्यैवस्यात्। परमनयोरनूढा परिणीत कन्ययोर्व
व्यत्ताविशेषोस्ति। यथा। अनुढा परिणीते वकन्या। परकीयातु परि
स धवा विधवा वा नापि स्वीकृता तदन्या चेति द्विधा परकीया। तस्याः संध

माह। स्वयंव एकाका विदतिकामास्मेरोन्मत्तासती स्वयमात्मनाऽप्रियंमनो
वेदत्। ज्ञापयेन्नायकाय। यथा। मध्यान्हेतिरवरैनिदाघसमयेतापाघनोव
कुञ्जवदेसुपत्रवकुलेहेपांथविश्राम्यतां। एकाकी च भवानहंचतरुणी शून्य
लग्रामेभणिलुस्वयंहिचतुरोजानासिकालोचितं।१। यद्वा। एकाकिनी
रुणी तथाहमस्मिन्गृहे गृहपतिश्चगतोविदेशं। किंयाचसेतदिहवासमियंव
श्रूर्मंमांधबधिरानन्नुमूढपांथ।२। अपरा एका सख्यामुखेनाभीष्टंप्रकट
यो। अन्नेअरुईअरई उजुवगवंजायाउसाभिणी। एहमंदासुलुसुहयसुंदरए
मंछपडिभरितुं।३। स्वपरस्त्रियोरष्टोतिस्त्रैरवस्थावस्छ। भवंति। स्वाधीनप
प्रोषितभर्तृका२ वनितांतरासक्ते प्रिये दुःखेनसंतप्तारवंडिता।३। ईर्षीकल
ननिर्गितेभर्त्तरिसंगमनांतरिताकलहांतरिता।४। परिस्यौभौफलार्थयानवेप्रसव
एववा। दुःखेवैवप्रमोदेचषडेतेवासकाः स्मृताः।१। उचितवासकेस्त्रीणाम्लु
कालोऽपिवाबुधैः। दृष्टापाणामथचेष्टानांकर्त्तव्यमुपसर्पणम्२ इतिनयेनवासके

संभोगलालसतयांगरागादिनाप्रगुणवासकसज्जा। ५। प्रियामन्यां चिरयन्ति दयिते वि
होत्कंठिता कादूतीमुखेन स्वयंवा संकेत केनापि कारणेन पत्याऽवंचिता विप्रलब्धा
। अभिसरति अभिसारयति कांतं कामार्त्तासतीत्यभिसारिका। ८। इति। १३। प
ण्यांगनास्वरूपमाह। सामान्य०। सद्गुणनिर्गुणयोः साधारणत्वात्सामान्य
निताकृत्या भवेत्। कथंभूता कपटपंडिता। कौटिल्यनिपुणा। केवलधनल
भालंबनेन कृत्रिमप्रेमत्वात्। यथा। या विचित्रविटकोटिनिघृष्टामद्यमां
निरतातिनिकृष्टा। कोमलाव वसि चेतसि दुष्टा तां भजंति गणिकां न वि
१ कुतः कृत्रिमप्रेमत्वं इत्याह। यतस्तस्या दायकं नायकं विनाऽनुकाप
न्न प्रियो भीष्टः। यथा। जात्यंधाय च दुर्मुखाय च जराजीर्णाखिलांग
मीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च। यच्छंती सुमनो
र्लक्ष्मीलव श्रद्धया पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु कोर
सर्व०। एवं वेश्या सर्वप्रकारांसर्वप्रकटं यथा स्याद्द्विनायकं याति सेवते। उ

अन्यस्त्री तांतिसरणामन्यनायिकानां प्रियसमागमः प्रच्छन्नवाच्यः। नायिकायाः
सपत्नी प्रतिनायिका॥१५॥ अथ वियोगविभेदानाह। पूर्वानु० पूर्वानुरागः १ मानात्
सः २ करुणात्मक ४ इति विप्रलंभो वियोगश्चतुर्द्धा चतुः प्रकारः स्यात्। अयंपू
गुरुस्तीव्रः कोर्थः चतुर्थीनीयः तृतीयाद्द्वितीयः द्वितीयात्प्रथमोगुः सहइति। अ
लक्षणमाह १६ स्त्रीपुंस० नायिकानायिकयोः प्रथमदर्शनादेवाद्दीप्तप्रेम्णो
र्द्वयोर्दशावस्था स्यात्। पूर्वानुरागो नाम वियोगो ज्ञेयः। यथा। जागर्त्ति लोको
तु प्रदीपः सखीजनः पश्यति कौतुकानि। मुहूर्त्तमेकं कुरु कांत धैर्यं बुभुक्षितः
करेण भुंक्ते १ अत्र नायकस्य पूर्वानुरागः॥ आयाते दयिते मनोरथशतैर्नीत्वा कथं
द्दिनं वैदग्ध्यापगमाज्जडे परिजने दीर्घां कथां कुर्वति। दष्टास्मीत्यभिधाय सत्वर
व्याधूय चीनांशुकं तन्वंग्या रतिकारतरेण मनसानीतः प्रदीपः शमं २ अत्र नायिका
पूर्वानुरागः प्रदीपप्रशमनं यावत् १७ द्वितीयामाह। मानोन्य० प्रियस्यान्यवनितासं
गात् नायिकायाः ---- ईर्ष्यया विकृतिः पराङ्मुखत्वादि प्रियस्य वा नायिकाव
लोकनादिना विकृतिः॥ समानवियोगो यथा। निःश्वासो वदनं दहति हृदयं निर्मूलं

मुन्मूल्यते निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुध्यते। अंगं शोषमुपैति पादप
तितः प्रेयांस्तदोपेक्षितः सख्यः किं गुणमालक्ष्य दयिते तत्त्वां वयं कारिताः २
अत्र नायिकाऽऽदृत्त सख्युपालंभैर्नायकस्य मनो ज्ञायते ३ लिखन्नास्ते भूमिं ब
हिरवनतः प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः। परि
त्यक्तं सर्वं हसितपठितं पंजरस्थैः शुकैस्तवावस्था चेयं विसृज कठिने मानमधुना
अत्र नायिकाः मानःप्रकटः। तृतीयमाह। प्रवासः। प्रिये प्रियायां वा दू
रस्थे यो विरहसंभवो विरहासक्तिः प्रवास उच्यते। यथा। धीरं वारिधर
स्य किरतः श्रुत्वा निशीथे ध्वनिं दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बा
ध्यायतः। अध्वनीनानविमुक्तकंठमखिलां रात्रिं तथा क्रंदितं ग्रामीणै
ध्वगस्य वसतिर्ग्रामे निषिद्धा यथा॥४॥ अत्र नायकस्य स्फुटं वि

१ मदेनालं

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनो ऽत्युत्सुकं गाढं प्रेम नवं वयो ऽतिकठिन
णाः कुलं निर्मलं। स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालिं कृतांतः क्षमी नोच्च नि
राः कथं नु विरहः सोढव्य इत्थं प्रिया। ६ अत्र नायिकायाः प्रियतमो दूरे इत्युं
सः ६।१० चतुर्थमाह। स्यादेकतः शृंगारः स्त्रियोर्धे नीयिका नायकेरे कर
मरणे परस्य प्रियस्य प्रियायावा विरहः। करुणाख्यो ऽयं करुणा नामास्याद्
दृत्तं वर्णिने आचारदार्ढ्यख्यापन एव प्रयोजनवानिति गम्यं। यथा। नीरा
ति सैतिकरूणांचिं तांसमालेब्य तेकिंचिद्ध्यायति निश्चलेन मनसा योगी वतु केक्ष
स्वो छायामवलोक्य कूजति यः को नास्ति तच्चक्रवत् धन्योयं प्रणयी नरो भ्रमरवर
घत्र नत्रादृतः। ७। अत्र नायकस्य करुणाविरहः। नतिं युगलकेमेवोन्मत्तपुष्पे
कारस्य त्रिनयन तनुवंसावाथुवा भ्रूमिपातः। विमलकुलभवानामंगनानां शरा
रीरं पतिकरजरजो वासितं तेसमुज्जिहं। ८। अत्र नायिकाया आदरदार्ढ्यम्।

इत्थं चतुर्ष्वपि विप्रलंभेषु नायिकनायकपरतयोदाहरणं दर्शितं। एषसंयोगवि
योगप्रच्छन्नप्रकाशादिभेदः शृंगारो नियतनायिकानिष्ठतयेव प्रतिपादितः। का
म्यं नाद्य च मे मैषा प्रियस्य मे कूनं। सांप्रतिप्रणयस्फुटाक्षक्षेपः इत्यादिसंबंधि नै
वयो अभिनीयमानं तत्तद्वचनादि दर्शनश्रवणानुभवरूपैर्विभावानुभावादि
साधारण्येन प्रतीतेरभिव्यक्तेः सभ्यानां वासनारूपेणास्थितः स्थायी रतिर
नुभूयमानतैकस्वभावो विभावादिस्मरणादिभिरलौकिकचमत्कारि दु
वल सुखमय एव शृंगारः। यत उक्तं। सुभाषितरसास्वादप्रज्ञातां
कंचुकः। विनापि कामिनी संगारं भित्तः सुखमेधते। १। इत्यादि
वीररसमाह।। उत्साह०। उत्साह आत्मा स्थायी यस्य स तथा। उत्स
वैरिगता मूढाध्यवसाय प्रताप विक्रमाधिक्षेपा विभावाः स्थैर्य धैर्य
शौर्यदयो अनुभावाः धृतिस्मृति गर्व मर्षादयो व्यभिचारिणश्च स्व

२ त्यचं कर्णः शिबिर्मांसं जीवं जीमूतवाहनः ददौ दधीचिरस्थीनि किमदेयं महात्मनाम्॥२
इत्येवं वीररसो भवेत्। त्रिधा त्रिप्रकारः। धर्माद्युद्धाद्दानतः। धर्मवीरास्त्रीकृत्वा
दयः। यथा। तुलयति पलभारैः सर्वधात्रीं न पात्रं पतमनिमतमेतद्वृत्तं तेन
वा यदुपवृत्ति मेहेस्मिन् हास्ये॥ दोर्विनापि व्यथितमहत्ना गंतोऽपि
अत्र परापतद्रक्षोयैर्निजशरीरस्याव्यये छां पुष्ठवी रामे घनाद रामप्रभृतय
ः। संत्रासमेते विजहति हरयः क्षुण्णशक्रेभकुंभा युद्धं गात्रेषु लज्जां द
ममी सायकानिष्फलं तः। सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघ
चिह्नभंग लीलानियमितजलधिं राममन्वेषयामि॥२॥ अत्र हरीन् लक्ष्म
णं रामान्वेषणं वीरे रूपं॥ दानवीरा विक्रमत्र भृतयः। इत्यादि।२१। हास्यर स
हास॥ हासो मूलं स्थायी यस्य स हासमूलो हास्यनामा रसो बुधैः समाख्यात
तः। अस्योत्पत्तिमाह। चेष्टा अपरगति वचनानुकृति प्रभृतयः। अंगवेषवैकृ
नर्त्तन शिरस्सिऽ जकर्त्तना प्रकारस्याव यवप्रकारा नादिस्ततः समाहरः तस्माद्वा
वाद्धास्यस्य चोद्भवो वाच्यः।२२। अस्यानुभावानाह। कपोल॥ कपोलयोर्हगाश्च दत

४ उल्लासोऽथेनस तथा। उपलक्षणं दोष्ठस्यंदननेत्रविकासमुखरागस्खलत्तालाद्या
अनुभावाः। त्रपावहित्थानिद्रालस्यादिव्यभिचारिणश्च ज्ञेयाः। स हास्यरसस्त्रेधा॥
स्मितं १ विहसितं २ अपहसितं चेति ३ तत्र महात्मनामुत्तमानामभिन्नोष्ठकपोलोल्
समात्रं स्मितं स्यात्। मध्यमानां विदीर्णास्यं हस्य दशनं सास्यरागं केलागतं वि
तं। अधमानां सशब्दं साश्रुनेत्रं निहतकं कंपितांसशिरोऽपहसितं। एतानि स्मि
नि दृष्ट्वा परस्य संक्रमणे संक्रमजातिः। हसितापहसितातिहसितानि।
फुल्लास्यनेत्रं विकासितगंडं किंचिद्दृश्यदंतं १ द्वितीयमुत्फुल्लनासं विजि
निरीक्षणं विकुंचितांसशिरस्कं। २। तृतीयं ससंरंभं साश्रुनेत्रं उद्धत
कराघातं ३ अयं भावः परं हसंतं दृष्ट्वा स्वयं वैभवादीनूपत्रयन्नपि
यथा नलकिंजमादि रसास्वादः पार्श्वस्थपुरुषमुखं दृष्ट्वापि लालां करो
मरूपत्वात्। एवं हास्येऽपि न त्वन्ये रसाः। यस्तु स्वामिन्नोकाङ्क्षस्यस्य

स्वामि हेतुकोन्य एव करुणारसः। नलु संक्रमणे जोहास्यवत्। कश्चिद्दाभी
सनू हस्यति परविभावादि योगं तर्हि सः स्यादेवेत्यर्थः। उदाहरणं यथा।
पालिमस्तु चिंपरमर्द्धि वित्तयाम्भत्रंभसा प्रति गृहाण हिरा - - - मेतत्
प्रहितघूक मदासहारं हाहाहतोहमिति रादिति विधुस्त्रामी १ तथा।
दंडं करतलकलितं धावधावस्मरत्वं पश्यस्याभेककोत्रोव्यधित तव
रात्रिश्च कश्चित्। नीवीपार्श्वे दृदत्तं कठिनमिदमिति क्षात्रमेकत्र मुक्ता
सा वदांतं पुनरपि तदधः केनचित्त्वलनरत्सा। उभयत्र हास्यं स्पष्टं।
याद्भुतरसमाह। विस्मय० तत्र नेत्रविकासः स्यात्पुलकः स्वेद एव च। विस्
त्मास्थायी यस्य स तथा। अद्भुतरसो विज्ञेयो विद्वद्भिः। स च दिव्य विमानेंद्र
जालवदातकर्म सिताद्यप्रिश्रष्टतिभिरसंभाव्यपुलभ्यवस्तुनः पदार्थस्य द
नभ्रवणरूप विभावात्प्राणिनां सहृदयानामुपजायते। भवति। अस्यानुभाव

२५ तत्राद्भुते निष्पन्ने नेत्रविकासः पुलकः स्वेदो निर्निमेषता साधु साध्विति वचनं गद्
दा अश्रुच्छागीर्बेसनुभावाश्च भवंति। उपलक्षणात् वीक्षु प्रसाद दानादयोपि। त
था। हर्षवेगजाड्यादि व्यभिचारिणोपि। यथा महानेष बत विकारः कांतिरेषा
नैवेवभंगिः। लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः। १ अ
मदनकलरशाखा लंबि जंबीर कुंभ गंभ विकच कमल कोशोदडिमीबीजपंक्तिः
हिनकिरणबिंबे खंडरीटः प्रभातस्त्रितयमिदमपूर्वं दिव दृष्टं मयाद्य। भ
द्भुता। इत्यादि। २४।२ प्रा भयानक। दिग्मा। भीतिः प्रकृतिः स्थायी यस्य
प्रकृतिर्भयानको नाम रसो भवेत्। कुतः घोरवस्तुनः। दिग्याचा
कृतस्वरश्रुति शून्यगृहारण्यांधकारादिरूपविभावात्। सत्त्व
ज्ञायेण वनितासु नीचेषु स्त्रीषु बालेषु च रसस्यैतद्वर्ण्यते। स्वाभाविकस्य
सद्भावात्। उदाहरणं यथा। बलैरालापहीनैर्विगतललितनयनैः कंप

ल्पकार्येर्द्दृष्ट्वा वेगात्त्रविष्टं निजनिजजननीं जानुजंघा भुजासु। ताभिः स्
प्सितानां प्रणयिषु हृदयेषु भिरंगे विलीनं श्रीशैवेयेनय क्रोप्रकटितपर्वनिं
पांचजन्यो। १। अथवा। अंबां बेति वचो वदंति शिशवो दास्यमी कातराः सं
प्रिय रक्ष रक्षेति च प्रोचुः प्रियाः स्व भिल्लं। मागाः त्रोषस्त्रीरोतरं प्रवि
तङ्सु सुकाः एवं वीर विभोर्दुनोतु दुरितं न्यंगुष्ठचेष्टां गिनी २ इत्यादि।
सुभयाभावे पि वेत्स्यादेः संभवति परं तत्कथनेन न किंचित्फलं। गुरुराजादिषु
गलाय कृतक क्रोधवाक्संभ्रमादयो नुभावाः। त्रासवैवर्ण्यमोहाद्याश्च व्यभि
लो विबुधैर्वर्ण्यंते कथ्यते। अथ रौद्रमाह। क्रोधो धूम्रास्स्थायी यस्
क्रोधात्मको रौद्रनामा रसो भवेत्। क्रोधश्च देशादारापहारजातिविद्यानिंदा
घ रिपरो भवरूप विभावाद्भूतः स्यात्। यथा। कृतमनुमतं दृष्टं वा यैरिदं गुरु
तकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभी
किरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं। १। इत्यादि। तत्र रौद्र

भीष्महन्तिर्स्सयकरव्यापारः॥ सामर्षः स्नॉस्नैषः उग्रः प्रचंडोनायकोभवेत॥ एतदनु
भावान्व्यभिचारिणआह। स्वांशा॰ अत्ररौद्रेस्वस्वेधप्रहतिः स्वश्लाघाशस्त्रक्षेप
णभ्रुकुटयोनुभावाः उपलक्षणामेत्र रागदंतोष्ठग्रहणरुधिराकर्षणादौ व्यपिभवंति।
था। धिपक्षाक्षेपोदलनं वैरिमर्दनं। उपलक्षणाद्दुष्टाव गाहामर्षाद्यपिच व्यभिच
तयोपवर्ण्यते॥ अथबीभत्सरसमाह। बीभत्स॰ बीभत्सोनामरसो जुगुप्सा
स्थायिनः स्यात्। जुगुप्साचसंनिवर्णपूतिकीटाद्यवस्तुश्रवणेक्षणादि
देति। यथा। उत्कृत्योत्कृत्यकृतिं प्रथमघट्टं थुलभूयांसमांसान्यंसस्फिक्
गपृष्टपिंडाद्यवयवसुलभान्युग्रपूतीनिजग्ध्वा। आर्तस्नाय्वंतनेत्रःप्रकटित
तरंककरंकान्कदस्थादेह स्थिसंस्थस्थपुटगतमपिचुच्या
अत्ति। यँ कू॥ शवस्मलम्लेषणमज्जास्थिपरिपूरिताः स्नायुस्पृ
स्त्रिपक्ष्मर्मप्रसेविकाद्रसादि। अत्रबीभत्सफूत्कृतिर्वक्त्रभंगः॥
मात्रसंकोचहल्लासोनामेविकुणानपिधाना॥ घोपिअनुभावतया॥

मोहापस्माराग्न्या। दिव्यभिचारिणःस्त्रयंवाद्याः॥ महतांउत्तमानांमभिचा।
। शांतरसमाह। सम्यकु॥१॥ वैराग्यसंसारभीरुदित्तादिमयंसम्यकुज्ञानं
वासमुत्थानंउत्पत्तिर्यस्य सतथाविधः। शांतोनामरसः स्यात्। कथं
नायकः निःस्पृहोनिरीहोनायकोयस्य सतथा। अस्यस्थायी पथा
गात्त्वक्षयात्स्थायिनः। सम्यकुज्ञानस्यचोद्भव उदयः स्यात्।
योनुभावा धृतिस्मृतिमहादयो व्यभिचारिणश्च स्वयं ज्ञेयाः। यथा। अ
सुमशयनेवादृषदिवामणौवालोष्ठेवाबलवतिरिपौवासुहृदिवा॥। तृण
ममसमदृशोयांतुदिवसाः क्वचित्पुण्यारण्ये जिनजिनजिनेतिप्रवदतः
चाशत्रौमित्रेहर्म्येरण्येसंमदेवागदेवाराज्येभैक्ष्येरत्नेलोष्ठेकांचनेवात
तस्त्रिन्यांकामिन्यांवानिंदनेवास्तुतौवा। चित्तंचित्तावस्थां हित्वासंश्रय
माधिं।२। अतशांतरसः प्रकार एव। एवमन्यान्यप्युदाहरणानिज्ञेय

६ अथ कवितां समर्थन्नाह। सारस्वतंनाम सरस्वती देवतं मंत्रविशेषं अहर्निशं
ध्यायंतः कविस्रष्टारः कविरूपं ध्यायंतः काव्यपुरुषं रचयंतु निष्पादयंतु
ति संबंधः। काव्यपुरुषं किंविशिष्टं। दोषैरनेकार्थादिभिरुज्झितं रहितं
याः गुणगणैरौदार्यादिभिराश्रितं सहितं। नानालंकृतिभिः शब्दार्थ...
त्रादिभिर्जातादिभिश्चित्तचमत्कारकारिणं। केषां सतामुत्तमानां।
स्फुरद्रूपयारीसांगोपांगादिकया भितः सर्वतः परीतं युतं। पुरुषप...
त्या आचारेण परीतं। तैस्तैः शास्त्रलोकप्रसिद्धैर्नवरसैः शृंगा...
न्मयां। तां गतं तद्रूपतां प्राप्तं गतं। कल्पांतकालात् आलोकक...
ल्पांतावधी सर्थः। अत्र सारस्वतध्यायिन इति शास्त्रप्रा...
ल१ र्गीनं नदोष कृत्। शब्दस्यैव मंग[illegible] रूपत्वात्॥ यतः

वाचकाः शब्दा ये च भङ्गादिवाचकाः ते सर्वे नैव निंद्याः स्युर्लिपितोग
णितोपि वा। इति श्री वाग्भटालंकारे पंचमपरिच्छेदस्य टीका ॥ समाप्ता॥
=॥ श्री गंगाधरो जयति॥ शके १६८८ व्ययसंवत्सरे चैत्राधिककृष्ण न
म्यां गुरौ उत्तराषाढायां शिवयोगे वसंते उदगयने जगन्नाथ [illegible]
करेण गौतमगोत्रिणा लिखितं [illegible] वाग्भटालंकारपुस्तकम्॥
श्री सांबसदाशिवो जयति [illegible] ॥ ॥ ॥ ॥

॥ वाग्भटालंकार पुस्तकं [illegible] मिदं ज्ञेयम् ॥ श्रीरस्तु

६८

[OrderDescription]
,CREATED=18.11.19 12:22
,TRANSFERRED=2019/11/18 at 12:41:58
,PAGES=139
,TYPE=STD
,NAME=S0002121
,Book Name=M-2330-VAGAMBHTALNKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF

FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,